# Rudra Gita

# રુદ્રગીતા

## Document Information

Text title : rudragItA varAhapurANe

File name : rudragItA.itx

Category : gItA, giitaa, shiva

Location : doc_giitaa

Proofread by : PSA Easwaran

Description-comments : Varahapurana adhyAya 70-89

Latest update : July 17, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 17, 2022

*sanskritdocuments.org*

# રુદ્રગીતા

## શ્રીવરાહપુરાણે સપ્તતિતમોऽધ્યાયઃ

ભદ્રાશ્વ ઉવાચ ।
ભગવન્ કિં કૃતં લોકં ત્વયા તમનુપશ્યતા ।
વ્રતં તપો વા ધર્મો વા પ્રાસ્યર્થં તસ્ય વૈ મુને ॥ ૭૦.૧॥

અનારાધ્ય હરિં ભક્ત્યા કો લોકાન્ કામયેદ્બુધઃ ।
આરાધિતે હરૌ લોકાઃ સર્વે કરતલેऽભવન્ ॥ ૭૦.૨॥

એવં સઞ્ચિન્ત્ય રાજેન્દ્ર મયા વિષ્ણુઃ સનાતનઃ ।
આરાધિતો વર્ષશતં ક્રતુભિર્ભૂરિદક્ષિણૈઃ ॥ ૭૦.૩॥

તતઃ કદાચિદ્બહુના કાલેન નૃપનન્દન ।
યજતો મમ દેવેશં યજ્ઞમૂર્તિં જનાર્દનમ્ ।
આહૂતા આગતા દેવાઃ સમમેવ સવાસવાઃ ॥ ૭૦.૪॥

સ્વે સ્વે સ્થાને સ્થિતા આસન્ યાવદ્દેવાઃ સવાસવાઃ ।
તાવત્ તત્રૈવ ભગવાનાગતો વૃષભધ્વજઃ ॥ ૭૦.૫॥

મહાદેવો વિરૂપાક્ષસ્ત્ર્યમ્બકો નીલલોહિતઃ ।
સોऽપિ રૌદ્રે સ્થિતઃ સ્થાને બભૂવ પરમેશ્વરઃ ॥ ૭૦.૬॥

તાન્ સર્વાનાગતાન્ દૃષ્ટ્વા દેવાનૃષિમહોરગાન્ ।
સનત્કુમારો ભગવાનાજગામાબ્જસમ્ભવઃ ॥ ૭૦.૭॥

ત્રસરેણુપ્રમાણેન વિમાને સૂર્યસન્નિભે ।
અવસ્થિતો મહાયોગી ભૂતભવ્યભવિષ્યવિત્ ॥ ૭૦.૮॥

આગમ્ય શિરસા રુદ્રં સ વવન્દે મહામુનિઃ ।
મયા પ્રણમિતસ્તસ્થૌ સમીપે શૂલપાણિનઃ ॥ ૭૦.૯॥

તાનહં સંસ્થિતાન્ દેવાન્ નારદાદીનૃષીંસ્તથા ।

સનત્કુમારરુદ્રૌ ચ દૃષ્ટ્વા મે મનસિ સ્થિતમ્ ॥ ૭૦.૧૦॥

ક એષાં ભવતે યાજ્યો વરિષ્ઠશ્ચ નૃપોત્તમ ।
કેન તુષ્ટેન તુષ્ટાઃ સ્યુઃ સર્વ એતે સરુદ્રકાઃ ॥ ૭૦.૧૧॥

એવં કૃત્વા સ્થિતે રાજન્ રુદ્રઃ પૃષ્ટો મયાઽનઘ ।
એવમર્થં ક ઇજ્યોઽત્ર યુષ્માકં સુરસત્તમાઃ ॥ ૭૦.૧૨॥

એવમુક્તે તદોવાચ રુદ્રો માં સુરસન્નિધૌ ॥ ૭૦.૧૩॥

રુદ્ર ઉવાચ ।
શ ૃણ્વન્તુ બિબુધાઃ સર્વે તથા દેવર્ષયોઽમલાઃ ।
બ્રહ્મર્ષયશ્ચ વિખ્યાતા સર્વે શ ૃણ્વન્તુ મે વચઃ ।
ત્વં ચાગસ્ત્ય મહાબુદ્ધે શ ૃણુ મે ગદતો વચઃ ॥ ૭૦.૧૪॥

યો યજ્ઞૈરીડ્યતે દેવો યસ્માત્ સર્વમિદં જગત્ ।
ઉત્પન્નં સર્વદા યસ્મિંલ્લીનં ભવતિ સામરમ્ ॥ ૭૦.૧૫॥

નારાયણઃ પરો દેવઃ સત્ત્વરૂપો જનાર્દનઃ ।
ત્રિધાઽઽત્માનં સ ભગવાન્ સસર્જ પરમેશ્વરઃ ॥ ૭૦.૧૬॥

રજસ્તમોભ્યાં યુક્તોઽભૂદ્રજઃ સત્ત્વાધિકં વિભુઃ ।
સસર્જ નાભિકમલે બ્રહ્માણં કમલાસનમ્ ॥ ૭૦.૧૭॥

રજસા તમસા યુક્તઃ સોઽપિ માં ત્વસૃજત્ પ્રભુઃ ।
યત્સત્ત્વં સ હરિર્દેવો યો હરિસ્તત્પરં પદમ્ ॥ ૭૦.૧૮॥

યે સત્ત્વરજસી સોઽપિ બ્રહ્મા કમલસમ્ભવઃ ।
યો બ્રહ્મા સૈવ દેવસ્તુ યો દેવઃ સઃ ચતુર્મુખઃ ।
યદ્રજસ્તમસોપેતં સોઽહં નાસ્ત્યત્ર સંશયઃ ॥ ૭૦.૧૯॥

સત્ત્વં રજસ્તમશ્ચૈવ ત્રિતયં ચૈતદુચ્યતે ।
સત્ત્વેન મુચ્યતે જન્તુઃ સત્ત્વં નારાયણાત્મકમ્ ॥ ૭૦.૨૦॥

રજસા સત્ત્વયુક્તેન ભવેત્ સૃષ્ટી રજોઽધિકા ।
તચ્ચ પૈતામહં વૃત્તં સર્વશાસ્ત્રેષુ પઠ્યતે ॥ ૭૦.૨૧॥

યદ્વેદબાહ્યં કર્મ સ્યાચ્છાસ્ત્રમુદ્દિશ્ય સેવ્યતે ।
તદ્રૌદ્રમિતિ વિખ્યાતં કનિષ્ઠં ગદિતં નૃણામ્ ॥ ૭૦.૨૨॥

યદ્ધીનં રજસા કર્મ કેવલં તામસં તુ યત્ ।

તદ્દુર્ગતિપરં નૃણામિહ લોકે પરત્ર ચ ॥ ૭૦.૨૩॥

સત્ત્વેન મુચ્યતે જન્તુઃ સત્ત્વં નારાયણાત્મકમ્ ।
નારાયણશ્ચ ભગવાન્ યજ્ઞરૂપી વિભાવ્યતે ॥ ૭૦.૨૪॥

કૃતે નારાયણઃ શુદ્ધઃ સૂક્ષ્મમૂર્તિરુપાસ્યતે ।
ત્રેતાયાં યજ્ઞરૂપેણ પઞ્ચરાત્રૈસ્તુ દ્વાપરે ॥ ૭૦.૨૫॥

કલૌ મત્કૃતમાર્ગેણ બહુરૂપેણ તામસૈઃ ।
ઇજ્યતે દ્વેષબુદ્ધ્યા સ પરમાત્મા જનાર્દનઃ ॥ ૭૦.૨૬॥

ન તસ્માત્ પરતો દેવો ભવિતા ન ભવિષ્યતિ ।
યો વિષ્ણુઃ સ સ્વયં બ્રહ્મા યો બ્રહ્મા સોઽહમેવ ચ ॥ ૭૦.૨૭॥

વેદત્રયેઽપિ યજ્ઞેઽસ્મિન્ યાજ્યં વેદેષુ નિશ્ચયઃ ।
યો ભેદં કુરુતેઽસ્માકં ત્રયાણાં દ્વિજસત્તમ ।
સ પાપકારી દુષ્ટાત્મા દુર્ગતિં ગતિમાપ્નુયાત્ ॥ ૭૦.૨૮॥

ઇદં ચ શ‍ૃણુ મેઽગસ્ત્ય ગદતઃ પ્રાક્તનં તથા ।
યથા કલૌ હરેર્ભક્તિં ન કુર્વન્તીહ માનવાઃ ॥ ૭૦.૨૯॥

ભૂર્લોકવાસિનઃ સર્વે પુરા યષ્ટ્વા જનાર્દનમ્ ।
ભુવર્લોકં પ્રપદ્યન્તે તત્રસ્થા અપિ કેશવમ્ ।
આરાધ્ય સ્વર્ગતિં યાન્તિ ક્રમાન્મુક્તિં વ્રજન્તિ ચ ॥ ૭૦.૩૦॥

એવં મુક્તિપદે વ્યાપ્તે સર્વલોકૈસ્તથૈવ ચ ।
મુક્તિભાજસ્તતો દેવાસ્તં દધ્યુઃ પ્રયતા હરિમ્ ॥ ૭૦.૩૧॥

સોઽપિ સર્વગતત્વાચ્ચ પ્રાદુર્ભૂતઃ સનાતનઃ ।
ઉવાચ બ્રૂત કિં કાર્યં સર્વયોગિવરાઃ સુરાઃ ॥ ૭૦.૩૨॥

તે તં પ્રણમ્ય દેવેશમૂચુશ્ચ પરમેશ્વરમ્ ।
દેવદેવ જનઃ સર્વો મુક્તિમાર્ગે વ્યવસ્થિતઃ ।
કથં સૃષ્ટિઃ પ્રભવિતા નરકેષુ ચ કો વસેત્ ॥ ૭૦.૩૩॥

એવમુક્તસ્તતો દેવૈસ્તાનુવાચ જનાર્દનઃ ।
યુગાનિ ત્રીણિ બહવો મામુપેષ્યન્તિ માનવાઃ ॥ ૭૦.૩૪॥

અન્ત્યે યુગે પ્રવિરલા ભવિષ્યન્તિ મદાશ્રયાઃ ।
એષ મોહં સૃજામ્યાશુ યો જનં મોહયિષ્યતિ ॥ ૭૦.૩૫॥

ત્વં ચ રુદ્ર મહાબાહો મોહશાસ્ત્રાણિ કારય ।
અલ્પાયાસં દર્શયિત્વા ફલં દીર્ઘં પ્રદર્શય ॥ ૭૦.૩૬॥

કુહકં ચેન્દ્રજાલાનિ વિરુદ્ધાચરણાનિ ચ ।
દર્શયિત્વા જનં સર્વં મોહયાશુ મહેશ્વર ॥ ૭૦.૩૭॥

એવમુક્ત્વા તદા તેન દેવેન પરમેષ્ઠિના ।
આત્મા તુ ગોપિતઃ સદ્યઃ પ્રકાશ્યોઽહં કૃતસ્તદા ॥ ૭૦.૩૮॥

તસ્માદારભ્ય કાલં તુ મત્પ્રણીતેષુ સત્તમ ।
શાસ્ત્રેષ્વભિરતો લોકો બાહુલ્યેન ભવેદતઃ ॥ ૭૦.૩૯॥

વેદાનુવર્ત્તિનં માર્ગં દેવં નારાયણં તથા ।
એકીભાવેન પશ્યન્તો મુક્તિભાજો ભવન્તિ તે ॥ ૭૦.૪૦॥

માં વિષ્ણોર્વ્યતિરિક્તં યે બ્રહ્માણં ચ દ્વિજોત્તમ ।
ભજન્તે પાપકર્માણસ્તે યાન્તિ નરકં નરાઃ ॥ ૭૦.૪૧॥

યે વેદમાર્ગનિર્મુક્તાસ્તેષાં મોહાર્થમેવ ચ ।
નયસિદ્ધાન્તસંજ્ઞાભિર્મયા શાસ્ત્રં તુ દર્શિતમ્ ॥ ૭૦.૪૨॥

પાશોઽયં પશુભાવસ્તુ સ યદા પતિતો ભવેત્ ।
તદા પાશુપતં શાસ્ત્રં જાયતે વેદસંજ્ઞિતમ્ ॥ ૭૦.૪૩॥

વેદમૂર્તિરહં વિપ્ર નાન્યશાસ્ત્રાર્થવાદિભિઃ ।
જ્ઞાયતે મત્સ્વરૂપં તુ મુક્ત્વા વેદમનાદિમત્ ।
વેદવેદ્યોઽસ્મિ વિપ્રર્ષે બ્રાહ્મણૈશ્ચ વિશેષતઃ ॥ ૭૦.૪૪॥

યુગાનિ ત્રીણ્યહં વિપ્ર બ્રહ્મા વિષ્ણુસ્તથૈવ ચ ।
ત્રયોઽપિ સત્ત્વાદિગુણાસ્ત્રયો વેદાસ્ત્રયોઽગ્નયઃ ॥ ૭૦.૪૫॥

ત્રયો લોકાસ્ત્રયઃ સન્ધ્યાસ્ત્રયો વર્ણાસ્તથૈવ ચ ।
સવનાનિ તુ તાવન્તિ ત્રિધા બદ્ધમિદં જગત્ ॥ ૭૦.૪૬॥

ય એવં વેત્તિ વિપ્રર્ષે પરં નારાયણં તથા ।
અપરં પદ્મયોનિં તુ બ્રહ્માણં ત્વપરં તુ મામ્ ।
ગુણતો મુખ્યતસ્ત્વેક એવાહં મોહ ઇત્યુત ॥ ૭૦.૪૭॥

॥ ઇતિ શ્રીવરાહપુરાણે ભગવચ્છાસ્ત્રે સપ્તતિતમોઽધ્યાયઃ ॥ ૭૦॥

# શ્રીવરાહપુરાણે એકસપ્તતિતમોઽધ્યાયઃ

અગસ્ત્ય ઉવાચ ।
એવમુક્તસ્તતો દેવા ઋષયશ્ચ પિનાકિના ।
અહં ચ નૃપતે તસ્ય દેવસ્ય પ્રણતોઽભવમ્ ॥ ૭૧.૧॥

પ્રણમ્ય શિરસા દેવં યાવત્ પશ્યામહે નૃપ ।
તાવત્ તસ્યૈવ રુદ્રસ્ય દેહસ્થં કમલાસનમ્ ॥ ૭૧.૨॥

નારાયણં ચ હૃદયે ત્રસરેણુસુસૂક્ષ્મકમ્ ।
જ્વલદ્ભાસ્કરવર્ણાભં પશ્યામ ભવદેહતઃ ॥ ૭૧.૩॥

તં દૃષ્ટ્વા વિસ્મિતાઃ સર્વે યાજકા ઋષયોઽભવન્ ।
જયશબ્દરવાંશ્ચક્રુઃ સામઋગ્યજુષાં સ્વનમ્ ॥ ૭૧.૪॥

કૃત્વોચુસ્તે તદા દેવં કિમિદં પરમેશ્વર ।
એકસ્યામેવ મૂર્તૌ તે લક્ષ્યન્તે ચ ત્રિમૂર્ત્તયઃ ॥ ૭૧.૫॥

રુદ્ર ઉવાચ ।
યજ્ઞેઽસ્મિન્ યદ્ધુતં હવ્યં મામુદ્દિશ્ય મહર્ષયઃ ।
તે ત્રયોઽપિ વયં ભાગં ગૃહ્ણીમઃ કવિસત્તમાઃ ॥ ૭૧.૬॥

નાસ્માકં વિવિધો ભાવો વર્તતે મુનિસત્તમાઃ ।
સમ્યગ્દૃશઃ પ્રપશ્યન્તિ વિપરીતેષ્વનેકશઃ ॥ ૭૧.૭॥

એવમુક્તે તુ રુદ્રેણ સર્વે તે મુનયો નૃપ ।
પપ્રચ્છુઃ શઙ્કરં દેવં મોહશાસ્ત્રપ્રયોજનમ્ ॥ ૭૧.૮॥

ઋષય ઊચુઃ ।
મોહનાર્થં તુ લોકાનાં ત્વયા શાસ્ત્રં પૃથક્ કૃતમ્ ।
તત્ ત્વયા હેતુના કેન કૃતં દેવ વદસ્વ નઃ ॥ ૭૧.૯॥

રુદ્ર ઉવાચ ।
અસ્ત્યેકે ભારતે વર્ષે વનં દણ્ડકસંજ્ઞિતમ્ ।
તત્ર તીવ્રં તપો ઘોરં ગૌતમો નામ વૈ દ્વિજઃ ॥ ૭૧.૧૦॥

ચકાર તસ્ય બ્રહ્મા તુ પરિતોષં ગતઃ પ્રભુઃ ।
ઉવાચ તં મુનિં બ્રહ્મા વરં બ્રૂહિ તપોધન ॥ ૭૧.૧૧॥

એવમુક્તસ્તદા તેન બ્રહ્મણા લોકકર્તૃણા ।

ઉવાચ સદ્યઃ પઙ્ક્તિં મે ધાન્યાનાં દેહિ પદ્મજ ॥ ૭૧.૧૨॥

એવમુક્તો દદૌ તસ્ય તમેવાર્થં પિતામહઃ ।
લબ્ધ્વા તુ તં વરં વિપ્રઃ શતશ‍ૃઙ્ગે મહાશ્રમમ્ ॥ ૭૧.૧૩॥

ચકાર તસ્યોષસિ ચ પાકાન્તે શાલયો દ્વિજાઃ ।
લૂયન્તે તેન મુનિના મધ્યાહ્ને પચ્યતે તથા ।
સર્વાતિથ્યમસૌ વિપ્રો બ્રાહ્મણેભ્યો દદાત્યલમ્ ॥ ૭૧.૧૪॥

કસ્યચિત્ ત્વથ કાલસ્ય મહતિ દ્વાદશાબ્દિકા ।
અનાવૃષ્ટિર્દ્વિજવરા અભવલ્લોમહર્ષિણી ॥ ૭૧.૧૫॥

તાં દૃષ્ટ્વા મુનયઃ સર્વે અનાવૃષ્ટિં વનેચરાઃ ।
ક્ષુધયા પીડ્યમામાસ્તુ પ્રયયુર્ગૌતમં તદા ॥ ૭૧.૧૬॥

અથ તાનાગતાન્ દૃષ્ટ્વા ગૌતમઃ શિરસા નતઃ ।
ઉવાચ સ્થીયતાં મહ્યં ગૃહે મુનિવરાત્મજાઃ ॥ ૭૧.૧૭॥

એવમુક્તાસ્તુ તે તેન તસ્થુર્વિવિધભોજનમ્ ।
ભુઞ્જમાના અનાવૃષ્ટિર્યાવત્ સા નિવૃતાઽભવત્ ॥ ૭૧.૧૮॥

નિવૃત્તાયાં તુ વૈ તસ્યામનાવૃષ્ટ્યાં તુ તે દ્વિજાઃ ।
તીર્થયાત્રાનિમિત્તં તુ પ્રયાતું મનસોઽભવન્ ॥ ૭૧.૧૯॥

તત્ર શાણ્ડિલ્યનામાનં તાપસં મુનિસત્તમમ્ ।
પ્રત્યુવાચેતિ સઞ્ચિન્ત્ય મારીચઃ પરમો મુનિઃ ॥ ૭૧.૨૦॥

મારીચ ઉવાચ ।
શાણ્ડિલ્ય શોભનં વક્ષ્યે પિતા તે ગૌતમો મુનિઃ ।
તમનુક્ત્વા ન ગચ્છામસ્તપશ્ચર્તું તપોવનમ્ ॥ ૭૧.૨૧॥

એવમુક્તેઽથ જહસુઃ સર્વે તે મુનયસ્તદા ।
કિમસ્માભિઃ સ્વકો દેહો વિક્રીતોઽસ્યાન્નભક્ષણાત્ ॥ ૭૧.૨૨॥

એવમુક્ત્વા પુનશ્ચોચુઃ સોપાધિગમનં પ્રતિ ।
કૃત્વા માયામયીં ગાં તુ તચ્છાલાયાં વ્યસર્જયન્ ॥ ૭૧.૨૩॥

તાં ચરન્તીં તતો દૃષ્ટ્વા શાલાયાં ગૌતમો મુનિઃ ।
ગૃહીત્વા સલિલં પાણૌ યાહિ રુદ્રેત્યભાષત ।
તતો માયામયી સા ગૌઃ પપાત જલબિન્દુભિઃ ॥ ૭૧.૨૪॥

નિહતાં તાં તતો દૃષ્ટ્વા મુનીન્ જિગમિષૂંસ્તથા ।
ઉવાચ ગૌતમો ધીમાંસ્તાન્ મુનીન્ પ્રણતઃ સ્થિતઃ ॥ ૭૧.૨૫॥

કિમર્થં ગમ્યતે વિપ્રાઃ સાધુ શંસત માચિરમ્ ।
માં વિહાય સદા ભક્તં પ્રણતં ચ વિશેષતઃ ॥ ૭૧.૨૬॥

ઋષય ઊચુઃ ।
ગોવધ્યેયમિહ બ્રહ્મન્ યાવત્ તવ શરીરગા ।
તાવદન્નં ન ભુઞ્જામો ભવતોઽન્નં મહામુને ॥ ૭૧.૨૭॥

એવમુક્તો ગૌતમોઽથ તાન્ મુનીન્ પ્રાહ ધર્મવિત્ ।
પ્રાયશ્ચિત્તં ગોવધ્યાયા દીયતાં મે તપોધનાઃ ॥ ૭૧.૨૮॥

ઇયં ગૌરમૃતા બ્રહ્મન્ મૂર્ચ્છિતેવ વ્યવસ્થિતા ।
ગઙ્ગાજલપ્લુતા ચેયમુત્થાસ્યતિ ન સંશયઃ ॥ ૭૧.૨૯॥

પ્રાયશ્ચિત્તં મૃતાયાઃ સ્યાદમૃતાયાઃ કૃતં ત્વિદમ્ ।
વ્રતં વા મા કૃથાઃ કોપમિત્યુક્ત્વા પ્રયયુસ્તુ તે ॥ ૭૧.૩૦॥

ગતૈસ્તૈર્ગૌતમો ધીમાન્ હિમવન્તં મહાગિરિમ્ ।
મામારાધયિષુઃ પ્રાયાત્ તપ્તું ચાશુ મહત્ તપઃ ॥ ૭૧.૩૧॥

શતમેકં તુ વર્ષાણામહમારાધિતોઽભવમ્ ।
તુષ્ટેન ચ મયા પ્રોક્તો વરં વરય સુવ્રત ॥ ૭૧.૩૨॥

સોઽબ્રવીન્માં જટાસંસ્થાં દેહિ ગઙ્ગાં તપસ્વિનીમ્ ।
મયા સાર્ધં પ્રયાત્વેષા પુણ્યા ભાગીરથી નદી ॥ ૭૧.૩૩॥

એવમુક્તે જટાખણ્ડમેકં સ પ્રદદૌ શિવઃ ।
તાં ગૃહ્ય ગતવાન્ સોઽપિ યત્રાસ્તે સા તુ ગૌર્મૃતા ॥ ૭૧.૩૪॥

તજ્જલપ્લાવિતા સા ગૌર્ગતા ચોત્થાય ભામિની ।
નદી ચ મહતી જાતા પુણ્યતોયા શુચિહ્રદા ॥ ૭૧.૩૫॥

તં દૃષ્ટ્વા મહદાશ્ચર્યં તત્ર સપ્તર્ષયોઽમલાઃ ।
આજગ્મુઃ ખે વિમાનસ્થાઃ સાધુ સાધ્વિતિ વાદિનઃ ॥ ૭૧.૩૬॥

સાધુ ગૌતમ સાધૂનાં કોઽન્યોઽસ્તિ સદૃશસ્તવ ।
યદેવં જાહ્નવીં દેવીં દણ્ડકે ચાવતારયત્ ॥ ૭૧.૩૭॥

એવમુક્તસ્તદા તૈસ્તુ ગૌતમઃ કિમિદં ત્વિતિ ।

ગોવધ્યાકારણં મહ્યં તાવત્ પશ્યતિ ગૌતમઃ ॥ ૭૧.૩૮॥

ઋષીણાં માયયા સર્વમિદં જાતં વિચિન્ત્ય વૈ ।
શશાપ તાન્ જટાભસ્મમિથ્યાવ્રતધરાસ્તથા ।
ભવિષ્યથ ત્રયીબાહ્યા વેદકર્મબહિષ્કૃતાઃ ॥ ૭૧.૩૯॥

તચ્છ્રુત્વા ક્રૂરવચનં ગૌતમસ્ય મહામુનેઃ ।
ઊચુઃ સપ્તર્ષયો મૈવં સર્વકાલં દ્વિજોત્તમાઃ ।
ભવન્તુ કિં તુ તે વાક્યં મોઘં નાસ્ત્યત્ર સંશયઃ ॥ ૭૧.૪૦॥

યદિ નામ કલૌ સર્વે ભવિષ્યન્તિ દ્વિજોત્તમાઃ ।
ઉપકારિણિ યે તે હિ અપકર્તાર એવ હિ ।
ઇત્થમ્ભૂતા અપિ કલૌ ભક્તિભાજો ભવન્તુ તે ॥ ૭૧.૪૧॥

ત્વદ્વાક્યવહ્નિનિર્દગ્ધાઃ સદા કલિયુગે દ્વિજાઃ ।
ભવિષ્યન્તિ ક્રિયાહીના વેદકર્મબહિષ્કૃતાઃ ॥ ૭૧.૪૨॥

અસ્યાશ્ચ ગૌણં નામેહ નદી ગોદાવરીતિ ચ ।
ગૌર્દત્તા વરદાનાચ્ચ ભવેદ્ગોદાવરી નદી ॥ ૭૧.૪૩॥

એતાં પ્રાપ્ય કલૌ બ્રહ્મન્ ગાં દદન્તિ જનાશ્ચ યે ।
યથાશક્ત્યા તુ દાનાનિ મોદન્તે ત્રિદશૈઃ સહ ॥ ૭૧.૪૪॥

સિંહસ્થે ચ ગુરૌ તત્ર યો ગચ્છતિ સમાહિતઃ ।
સ્નાત્વા ચ વિધિના તત્ર પિતૃંસ્તર્પયતે તથા ॥ ૭૧.૪૫॥

સ્વર્ગં ગચ્છન્તિ પિતરો નિરયે પતિતા અપિ ।
સ્વર્ગસ્થાઃ પિતરસ્તસ્ય મુક્તિભાજો ન સંશયઃ ॥ ૭૧.૪૬॥

ત્વં ખ્યાતિં મહતીં પ્રાપ્ય મુક્તિં યાસ્યસિ શાશ્વતીમ્ ।
એવમુક્ત્વાઽથ મુનયો યયુઃ કૈલાસપર્વતમ્ ।
યત્રાહમુમયા સાર્ધં સદા તિષ્ઠામિ સત્તમાઃ ॥ ૭૧.૪૭॥

ઊચુર્માં તે ચ મુનયો ભવિતારો દ્વિજોત્તમાઃ ।
કલૌ ત્વદ્રૂપિણઃ સર્વે જટામુકુટધારિણઃ ।
સ્વેચ્છયા પ્રેતવેષાશ્ચ મિથ્યાલિઙ્ગધરાઃ પ્રભો ॥ ૭૧.૪૮॥

તેષામનુગ્રહાર્થાય કિઞ્ચિચ્છાસ્ત્રં પ્રદીયતામ્ ।
યેનાસ્મદ્વંશજાઃ સર્વે વર્તેયુઃ કલિપીડિતાઃ ॥ ૭૧.૪૯॥

એવમભ્યર્થિતસ્તૈસ્તુ પુરાઽહં દ્વિજસત્તમાઃ ।
વેદક્રિયાસમાયુક્તાં કૃતવાનસ્મિ સંહિતામ્ ॥ ૭૧.૫૦॥

નિઃશ્વાસાખ્યાં તતસ્તસ્યાં લીના બાભ્રવ્યશાણ્ડિલાઃ ।
અલ્પાપરાધાચ્છ્રુત્વૈવ ગતા બૈડાલિકાઽભવન્ ॥ ૭૧.૫૧॥

મયૈવ મોહિતાસ્તે હિ ભવિષ્યં જાનતા દ્વિજાઃ ।
લૌલ્યાર્થિનસ્તુ શાસ્ત્રાણિ કરિષ્યન્તિ કલૌ નરાઃ ॥ ૭૧.૫૨॥

નિઃશ્વાસસંહિતાયાં હિ લક્ષમાત્રં પ્રમાણતઃ ।
સૈવ પાશુપતી દીક્ષા યોગઃ પાશુપતસ્ત્વિહ ॥ ૭૧.૫૩॥

એતસ્માદ્વેદમાર્ગાદ્ધિ યદન્યદિહ જાયતે ।
તત્ ક્ષુદ્રકર્મ વિજ્ઞેયં રૌદ્રં શૌચવિવર્જિતમ્ ॥ ૭૧.૫૪॥

યે રુદ્રમુપજીવન્તિ કલૌ વૈડાલિકા નરાઃ ।
લૌલ્યાર્થિનઃ સ્વશાસ્ત્રાણિ કરિષ્યન્તિ કલૌ નરાઃ ।
ઉચ્છુષ્મરુદ્રાસ્તે જ્ઞેયા નાહં તેષુ વ્યવસ્થિતઃ ॥ ૭૧.૫૫॥

ભૈરવેણ સ્વરૂપેણ દેવકાર્યે યદા પુરા ।
નર્તિતં તુ મયા સોઽયં સમ્બન્ધઃ ક્રૂરકર્મણામ્ ॥ ૭૧.૫૬॥

ક્ષયં નિનીષતા દૈત્યાનટ્ટહાસો મયા કૃતઃ ।
યઃ પુરા તત્ર યે મહ્યં પતિતા અશ્રુબિન્દવઃ ।
અસઙ્ખ્યાતાસ્તુ તે રૌદ્રા ભવિતારો મહીતલે ॥ ૭૧.૫૭॥

ઉચ્છુષ્મનિરતા રૌદ્રાઃ સુરામાંસપ્રિયાઃ સદા ।
સ્ત્રીલોલાઃ પાપકર્માણઃ સમ્ભૂતા ભૂતલેષુ તે ॥ ૭૧.૫૮॥

તેષાં ગૌતમશાપાદ્ધિ ભવિષ્યન્ત્યન્વયે દ્વિજાઃ ।
તેષાં મધ્યે સદાચારા યે તે મચ્છાસને રતાઃ ॥ ૭૧.૫૯॥

સ્વર્ગં ચૈવાપવર્ગં ચ ઇતિ વૈ સંશયાત્ પુરા ।
વૈડાલિકાઽધો યાસ્યન્તિ મમ સન્તતિદૂષકાઃ ॥ ૭૧.૬૦॥

પ્રાગ્ગૌતમાગ્નિના દગ્ધાઃ પુનર્મદ્વચનાદ્દ્વિજાઃ ।
નરકં તુ ગમિષ્યન્તિ નાત્ર કાર્યા વિચારણા ॥ ૭૧.૬૧॥

રુદ્ર ઉવાચ ।
એવં મયા બ્રહ્મસુતાઃ પ્રોક્તા જગ્મુર્યથાગતમ્ ।

ગૌતમોઽપિ સ્વકં ગેહં જગામાશુ પરન્તપઃ ॥ ૭૧.૬૨॥

એતદ્વઃ કથિતં વિપ્રા મયા ધર્મસ્ય લક્ષણમ્ ।
એતસ્માદ્વિપરીતો યઃ સ પાષણ્ડરતો ભવેત્ ॥ ૭૧.૬૩॥

॥ ઇતિ શ્રીવરાહપુરાણે ભગવચ્છાસ્ત્રે એકસપ્તતિતમોઽધ્યાયઃ ॥ ૭૧॥

## શ્રીવરાહપુરાણે દ્વિસપ્તતિતમોઽધ્યાયઃ

શ્રીવરાહ ઉવાચ ।
સર્વજ્ઞં સર્વકર્ત્તારં ભવં રુદ્રં પુરાતનમ્ ।
પ્રણમ્ય પ્રયતોઽગસ્ત્યઃ પપ્રચ્છ પરમેશ્વરમ્ ॥ ૭૨.૧॥

અગસ્ત્ય ઉવાચ ।
ભવાન્ બ્રહ્મા ચ વિષ્ણુશ્ચ ત્રયમેતત્ ત્રયી સ્મૃતા ।
દીપોઽગ્નિર્દીપસંયોગૈઃ સર્વશાસ્ત્રેષુ સર્વતઃ ॥ ૭૨.૨॥

કસ્મિન્ પ્રધાનો ભગવાન્ કાલે કસ્મિન્નધોક્ષજઃ ।
બ્રહ્મા વા એતદાચક્ષ્વ મમ દેવ ત્રિલોચન ॥ ૭૨.૩॥

રુદ્ર ઉવાચ ।
વિષ્ણુરેવ પરં બ્રહ્મ ત્રિભેદમિહ પઠ્યતે ।
વેદસિદ્ધાન્તમાર્ગેષુ તન્ન જાનન્તિ મોહતાઃ ॥ ૭૨.૪॥

વિશ પ્રવેશને ધાતુસ્તત્ર સ્નુપ્રત્યયાદનુ ।
વિષ્ણુર્યઃ સર્વદેવેષુ પરમાત્મા સનાતનઃ ॥ ૭૨.૫॥

યોઽયં વિષ્ણુસ્તુ દશધા કીર્ત્યતે ચૈકધા દ્વિજાઃ ।
સ આદિત્યો મહાભાગ યોગૈશ્વર્યસમન્વિતઃ ॥ ૭૨.૬॥

સ દેવકાર્યાણિ સદા કુરુતે પરમેશ્વરઃ ।
મનુષ્યભાવમાશ્રિત્ય સ માં સ્તૌતિ યુગે યુગે ।
લોકમાર્ગપ્રવૃત્ત્યર્થં દેવકાર્યાર્થસિદ્ધયે ॥ ૭૨.૭॥

અહં ચ વરદસ્તસ્ય દ્વાપરે દ્વાપરે દ્વિજ ।
અહં ચ તં સદા સ્તૌમિ શ્વેતદ્વીપે કૃતે યુગે ॥ ૭૨.૮॥

સૃષ્ટિકાલે ચતુર્વક્ત્રં સ્તૌમિ કાલો ભવામિ ચ ।
બ્રહ્મા દેવાસુરા સ્તૌતિ માં સદા તુ કૃતે યુગે ।

લિઙ્ગમૂર્તિં ચ માં દેવા યજન્તે ભોગકાઙ્ક્ષિણઃ ॥ ૭૨.૯॥

સહસ્રશીર્ષકં દેવં મનસા તુ મુમુક્ષવઃ ।
યજન્તે યં સ વિશ્વાત્મા દેવો નારાયણઃ સ્વયમ્ ॥ ૭૨.૧૦॥

બ્રહ્મયજ્ઞેન યે નિત્યં યજન્તે દ્વિજસત્તમાઃ ।
તે બ્રહ્માણં પ્રીણયન્તિ વેદો બ્રહ્મા પ્રકીર્તિતઃ ॥ ૭૨.૧૧॥

નારાયણઃ શિવો વિષ્ણુઃ શઙ્કરઃ પુરુષોત્તમઃ ।
એતૈસ્તુ નામભિર્બ્રહ્મ પરં પ્રોક્તં સનાતનમ્ ।
તં ચ ચિન્તામયં યોગં પ્રવદન્તિ મનીષિણઃ ॥ ૭૨.૧૨॥

પશૂનાં શમનં યજ્ઞે હોમકર્મ ચ યદ્ભવેત્ ।
તદોમિતિ ચ વિખ્યાતં તત્રાહં સંવ્યવસ્થિતઃ ॥ ૭૨.૧૩॥

કર્મવેદયુજાં વિપ્ર બ્રહ્મા વિષ્ણુર્મહેશ્વરઃ ।
વયં ત્રયોઽપિ મન્ત્રાદ્યા નાત્ર કાર્યા વિચારણા ॥ ૭૨.૧૪॥

અહં વિષ્ણુસ્તથા વેદા બ્રહ્મ કર્માણિ ચાપ્યુત ।
એતત્ ત્રયં ત્વેકમેવ ન પૃથગ્ભાવયેત્ સુધીઃ ॥ ૭૨.૧૫॥

યોઽન્યથા ભાવયેદેતત્ પક્ષપાતેન સુવ્રત ।
સ યાતિ નરકં ઘોરં રૌરવં પાપપૂરુષઃ ॥ ૭૨.૧૬॥

અહં બ્રહ્મા ચ વિષ્ણુશ્ચ ઋગ્યજુઃ સામ એવ ચ ।
નૈતસ્મિન્ ભેદમસ્યાસ્તિ સર્વેષાં દ્વિજસત્તમ ॥ ૭૨.૧૭॥

॥ ઇતિ શ્રીવરાહપુરાણે ભગવચ્છાસ્ત્રે દ્વિસપ્તતિતમોઽધ્યાયઃ ॥ ૭૨॥

## શ્રીવરાહપુરાણે ત્રિસપ્તતિતમોઽધ્યાયઃ

રુદ્ર ઉવાચ ।
શ‍ૃણુ ચાન્યદ્દ્વિજશ્રેષ્ઠ કૌતૂહલસમન્વિતમ્ ।
અપૂર્વભૂતં સલિલે મગ્નેન મુનિપુઙ્ગવ ॥ ૭૩.૧॥

બ્રહ્મણાઽહં પુરા સૃષ્ટઃ પ્રોક્તશ્ચ સૃજ વૈ પ્રજાઃ ।
અવિજ્ઞાનસમર્થોઽહં નિમગ્નઃ સલિલે દ્વિજ ॥ ૭૩.૨॥

તત્ર યાવત્ ક્ષણં ચૈકં તિષ્ઠામિ પરમેશ્વરમ્ ।
અઙ્ગુષ્ઠમાત્રં પુરુષં ધ્યાયન્ પ્રયતમાનસઃ ॥ ૭૩.૩॥

તાવજ્જલાત્ સમુત્તસ્થુઃ પ્રલયાગ્નિસમપ્રભાઃ ।
પુરુષા દશ ચૈકશ્ચ તાપયન્તોઽમ્શુભિર્જલમ્ ॥ ૭૩.૪॥

મયા પૃષ્ટાઃ કે ભવન્તો જલાદુત્તીર્ય તેજસા ।
તાપયન્તો જલં ચેદં ક્વ વા યાસ્યથ શંસત ॥ ૭૩.૫॥

એવમુક્તા મયા તે તુ નોચુઃ કિઞ્ચન સત્તમાઃ ।
એવમેવ ગતાસ્તૂષ્ણીં તે નરા દ્વિજપુઙ્ગવ ॥ ૭૩.૬॥

તતસ્તેષામનુ મહાપુરુષોઽતીવશોભનઃ ।
સ તસ્મિન્ મેઘસઙ્કાશઃ પુણ્ડરીકનિભેક્ષણઃ ॥ ૭૩.૭॥

તમહં પૃષ્ટવાન્ કસ્ત્વં કે ચેમે પુરુષા ગાતાઃ ।
કિં વા પ્રયોજનમિહ કથ્યતાં પુરુષર્ષભ ॥ ૭૩.૮॥

પુરુષ ઉવાચ ।
ય એતે વૈ ગતાઃ પૂર્વં પુરુષા દીપ્તતેજસઃ ।
આદિત્યાસ્તે ત્વરં યાન્તિ ધ્યાતા વૈ બ્રહ્મણા ભવ ॥ ૭૩.૯॥

સૃષ્ટિં સૃજતિ વૈ બ્રહ્મા તદર્થં યાન્ત્યમી નરાઃ ।
પ્રતિપાલનાય તસ્યાસ્તુ સૃષ્ટેર્દેવ ન સંશયઃ ॥ ૭૩.૧૦॥

શમ્ભુરુવાચ ।
ભગવન્ કથં જાનીષે મહાપુરુષસત્તમ ।
ભવેતિ નામ્ના તત્સર્વં કથયસ્વ પરો હ્યહમ્ ॥ ૭૩.૧૧॥

એવમુક્તસ્તુ રુદ્રેણ સ પુમાન્ પ્રત્યભાષત ।
અહં નારાયણો દેવો જલશાયી સનાતનઃ ॥ ૭૩.૧૨॥

દિવ્યં ચક્ષુર્ભવતુ વૈ તવ માં પશ્ય યત્નતઃ ।
એવમુક્તસ્તદા તેન યાવત્પશ્યામ્યહં તુ તમ્ ॥ ૭૩.૧૩॥

તાવદઙ્ગુષ્ઠમાત્રં તુ જ્વલદ્ભાસ્કરતેજસમ્ ।
તમેવાહં પ્રપશ્યામિ તસ્ય નાભૌ તુ પઙ્કજમ્ ॥ ૭૩.૧૪॥

બ્રહ્માણં તત્ર પશ્યામિ આત્માનં ચ તદઙ્કતઃ ।
એવં દૃષ્ટ્વા મહાત્માનં તતો હર્ષમુપાગતઃ ।
તં સ્તોતું દ્વિજશાર્દૂલ મતિર્મે સમજાયત ॥ ૭૩.૧૫॥

તસ્ય મૂર્તૌ તુ જાતાયાં સ્તોત્રેણાનેન સુવ્રત ।
સ્તુતો મયા સ વિશ્વાત્મા તપસા સ્મૃતકર્મણા ॥ ૭૩.૧૬॥

રુદ્ર ઉવાચ ।
નમોઽસ્ત્વનન્તાય વિશુદ્ધચેતસે
સરૂપરૂપાય સહસ્રબાહવે ।
સહસ્રરશ્મિપ્રવરાય વેધસે
વિશાલદેહાય વિશુદ્ધકર્મિણે ॥ ૭૩.૧૭॥

સમસ્તવિશ્વાર્તિહરાય શમ્ભવે
સહસ્રસૂર્યાનિલતિગ્મતેજસે ।
સમસ્તવિદ્યાવિધૃતાય ચક્રિણે
સમસ્તગીર્વાણનુતે સદાઽનઘ ॥ ૭૩.૧૮॥

અનાદિદેવોઽચ્યુત શેષશેખર
પ્રભો વિભો ભૂતપતે મહેશ્વર ।
મરુત્પતે સર્વપતે જગત્પતે
ભુવઃ પતે ભુવનપતે સદા નમઃ ॥ ૭૩.૧૯॥

જલેશ નારાયણ વિશ્વશઙ્કર
ક્ષિતીશ વિશ્વેશ્વર વિશ્વલોચન ।
શશાઙ્કસૂર્યાચ્યુત વીર વિશ્વગા -
પ્રતર્ક્યમૂર્ત્તેઽમૃતમૂર્તિરવ્યયઃ ॥ ૭૩.૨૦॥

જ્વલદ્ધુતાશાર્ચિવિરુદ્ધમણ્ડલ
પ્રપાહિ નારાયણ વિશ્વતોમુખ ।
નમોઽસ્તુ દેવાર્ત્તિહરામૃતાવ્યય
પ્રપાહિ માં શરણગતં સદાચ્યુત ॥ ૭૩.૨૧॥

વક્ત્રાણ્યનેકાનિ વિભો તવાહં
પશ્યામિ મધ્યસ્થગતં પુરાણમ્ ।
બ્રહ્માણમીશં જગતાં પ્રસૂતિં
નમોઽસ્તુ તુભ્યં તુ પિતામહાય ॥ ૭૩.૨૨॥

સંસારચક્રભ્રમણૈરનેકૈઃ
ક્વચિદ્ભવાન્ દેવવરાદિદેવ ।
સન્માર્ગિભિર્જ્ઞાનવિશુદ્ધસત્ત્વૈ -

રુપાસ્યસે કિં પ્રણમામ્યહં ત્વામ્ ॥ ૭૩.૨૩॥

એકં ભવન્તં પ્રકૃતેઃ પરસ્તાદ્-
યો વેત્ત્યસૌ સર્વવિદાદિબોદ્ધા ।
ગુણા ન તેષુ પ્રસભં વિભેદ્યા
વિશાલમૂર્તિર્હિ સુસૂક્ષ્મરૂપઃ ॥ ૭૩.૨૪॥

નિર્વાક્યો નિર્મનો વિગતેન્દ્રિયોઽસિ
વિકર્મા ભવાન્નો વિગતૈકકર્મા ।
સંસારવાંસ્ત્વં હિ ન તાદૃશોઽસિ
પુનઃ કથં દેવવરાસિ વેદ્યઃ ॥ ૭૩.૨૫॥

મૂર્તામૂર્તં ત્વતુલં લભ્યતે તે
પરં વપુર્દેવ વિશુદ્ધભાવૈઃ ।
સંસારવિચ્છિત્તિકરૈર્યજદ્ભિ -
રતોઽવસીયેત ચતુર્ભુજસ્ત્વમ્ ॥ ૭૩.૨૬॥

પરં ન જાનન્તિ યતો વપુસ્તે
દેવાદયોઽપ્યદ્ભુતકારણં તત્ ।
અતોઽવતારોક્તતનું પુરાણ -
મારાધયેયુઃ કમલાસનાદ્યાઃ ॥ ૭૩.૨૭॥

ન તે વપુર્વિશ્વસૃગબ્જયોનિ-
રેકાન્તતો વેદ મહાનુભાવઃ ।
પરં ત્વહં વેદ્મિ કવિં પુરાણં
ભવન્તમાદ્યં તપસા વિશુદ્ધઃ ॥ ૭૩.૨૮॥

પદ્માસનો મે જનકઃ પ્રસિદ્ધ-
શ્ચૈતત્ પ્રસૂતાવસકૃત્પુરાણૈઃ ।
સમ્બોધ્યતે નાથ ન મદ્વિધોઽપિ
વિદુર્ભવન્તં તપસા વિહીનાઃ ॥ ૭૩.૨૯॥

બ્રહ્માદિભિસ્તત્પ્રવરૈરબોધ્યં
ત્વાં દેવ મૂર્ખાઃ સ્વમનન્તનત્યા ।
પ્રબોધમિચ્છન્તિ ન તેષુ બુદ્ધિ -
રુદારકીર્ત્તિષ્વપિ વેદહીનાઃ ॥ ૭૩.૩૦॥

જન્માન્તરૈર્વેદવિદાં વિવેક -
બુદ્ધિર્ભવેન્નાથ તવ પ્રસાદાત્ ।
ત્વલ્લબ્ધલાભસ્ય ન માનુષત્વં
ન દેવગન્ધર્વગતિઃ શિવં સ્યાત્ ॥ ૭૩.૩૧॥

ત્વં વિષ્ણુરૂપોઽસિ ભવાન્ સુસૂક્ષ્મઃ
સ્થૂલોઽસિ ચેદં કૃતકૃત્યતાયાઃ ।
સ્થૂલઃ સુસૂક્ષ્મઃ સુલભોઽસિ દેવ
ત્વદ્બાહ્યવૃત્ત્યા નરકે પતન્તિ ॥ ૭૩.૩૨॥

કિમુચ્યતે વા ભવતિ સ્થિતેઽસ્મિન્
ખાત્મ્યેન્દુવહ્ન્યર્કમહીમરુદ્ભિઃ ।
તત્ત્વૈઃ સતોયૈઃ સમરૂપધારિ-
ણ્યાત્મસ્વરૂપે વિતતસ્વભાવે ॥ ૭૩.૩૩॥

ઇતિ સ્તુતિં મે ભગવન્નનન્ત
જુષસ્વ ભક્તસ્ય વિશેષતશ્ચ ।
સૃષ્ટિં સૃજસ્વેતિ તવોદિતસ્ય
સર્વજ્ઞતાં દેહિ નમોઽસ્તુ વિષ્ણો ॥ ૭૩.૩૪॥

ચતુર્મુખો યો યદિ કોટિવક્ત્રો
ભવેન્નરઃ ક્વાપિ વિશુદ્ધચેતાઃ ।
સ તે ગુણાનામયુતૈરનેકૈ -
ર્વદેત્ તદા દેવવર પ્રસીદ ॥ ૭૩.૩૫॥

સમાધિયુક્તસ્ય વિશુદ્ધબુદ્ધે -
સ્ત્વદ્ભાવભાવૈકમનોઽનુગસ્ય ।
સદા હૃદિસ્થોઽસિ ભવાન્નમસ્તે
ન સર્વગસ્યાસ્તિ પૃથગ્વ્યવસ્થા ॥ ૭૩.૩૬॥

ઇતિ પ્રકાશં કૃતમેતદીશ
સ્તવં મયા સર્વગતં વિબુદ્ધ્વા ।
સંસારચક્રક્રમમાણયુક્ત્યા
ભીતં પુનીહ્યચ્યુત કેવલત્વમ્ ॥ ૭૩.૩૭॥

શ્રીવરાહ ઉવાચ ।
ઇતિ સ્તુતસ્તદા દેવો રુદ્રેણામિતતેજસા ।

ઉવાચ વાક્યં સન્તુષ્ટો મેઘગમ્ભીરનિઃસ્વનઃ ॥ ૭૩.૩૮॥

વિષ્ણુરુવાચ ।
વરં વરય ભદ્રં તે દેવદેવ ઉમાપતે ।
ન ભેદશ્ચાવયોર્દેવ એકાવાવામુભાવપિ ॥ ૭૩.૩૯॥

રુદ્ર ઉવાચ ।
બ્રહ્મણાઽહં નિયુક્તસ્તુ પ્રજાઃ સૃજ ઇતિ પ્રભો ।
તત્ર જ્ઞાનં પ્રયચ્છસ્વ ત્રિવિધં ભૂતભાવનમ્ ॥ ૭૩.૪૦॥

વિષ્ણુરુવાચ ।
સર્વજ્ઞસ્ત્વં ન સન્દેહો જ્ઞાનરાશિઃ સનાતનઃ ।
દેવાનાં ચ પરં પૂજ્યઃ સર્વદા ત્વં ભવિષ્યસિ ॥ ૭૩.૪૧॥

એવમુક્તઃ પુનર્વાક્યમુવાચોમાપતિર્મુદા ।
અન્યં દેહિ વરં દેવ પ્રસિદ્ધં સર્વજન્તુષુ ॥ ૭૩.૪૨॥

મૂર્તો ભૂત્વા ભવાનેવ મામારાધય કેશવ ।
માં વહસ્વ ચ દેવેશ વરં મત્તો ગૃહાણ ચ ।
યેનાહં સર્વદેવાનાં પૂજ્યાત્ પૂજ્યતરો ભવે ॥ ૭૩.૪૩॥

વિષ્ણુરુવાચ ।
દેવકાર્યાવતારેષુ માનુષત્વમુપાગતઃ ।
ત્વામેવારાધયિષ્યામિ ત્વં ચ મે વરદો ભવ ॥ ૭૩.૪૪॥

યત્ ત્વયોક્તં વહસ્વેતિ દેવદેવ ઉમાપતે ।
સોઽહં વહામિ ત્વાં દેવં મેઘો ભૂત્વા શતં સમાઃ ॥ ૭૩.૪૫॥

એવમુક્ત્વા હરિર્મેઘઃ સ્વયં ભૂત્વા મહેશ્વરમ્ ।
ઉજ્જહાર જલાત્ તસ્માદ્વાક્યં ચેદમુવાચ હ ॥ ૭૩.૪૬॥

ય એતે દશ ચૈકશ્ચ પુરુષાઃ પ્રાકૃતાઃ પ્રભો ।
તે વૈરાજા મહીં યાતા આદિત્યા ઇતિ સંજ્ઞિતાઃ ॥ ૭૩.૪૭॥

મદંશો દ્વાદશો યસ્તુ વિષ્ણુનામા મહીતલે ।
અવતીર્ણો ભવન્તં તુ આરાધયતિ શઙ્કર ॥ ૭૩.૪૮॥

એવમુક્ત્વા સ્વકાદંશાત્ સૃષ્ટ્વાદિત્યં ઘનં તથા ।
નારાયણઃ શબ્દવચ્ચ ન વિદ્મઃ ક્વ લયં ગતઃ ॥ ૭૩.૪૯॥

રુદ્ર ઉવાચ ।
એવમેષ હરિર્દેવઃ સર્વગઃ સર્વભાવનઃ ।
વરદોઽભૂત્ પુરા મહ્યં તેનાહં દૈવતૈર્વરઃ ॥ ૭૩.૫૦॥

નારાયણાત્ પરો દેવો ન ભૂતો ન ભવિષ્યતિ ।
એતદ્રહસ્યં વેદાનાં પુરાણાનાં ચ સત્તમ ।
મયા વઃ કીર્તિતં સર્વં યથા વિષ્ણુરિહેજ્યતે ॥ ૭૩.૫૧॥

॥ ઇતિ શ્રીવરાહપુરાણે ભગવચ્છાસ્ત્રે ત્રિસપ્તતિતમોઽધ્યાયઃ ॥ ૭૩॥

## શ્રીવરાહપુરાણે ચતુઃસપ્તતિતમોઽધ્યાયઃ

શ્રીવરાહ ઉવાચ ।
પુનસ્તે ઋષયઃ સર્વે તં પપ્રચ્છુઃ સનાતનમ્ ।
રુદ્રં પુરાણપુરુષં શાશ્વતં ધ્રુવમવ્યયમ્ ।
વિશ્વરૂપમજં શમ્ભું ત્રિનેત્રં શૂલપાણિનમ્ ॥ ૭૪.૧॥

ઋષય ઊચુઃ ।
ત્વં પરઃ સર્વદેવાનામસ્માકં ચ સુરેશ્વર ।
પૃચ્છામ તેન ત્વાં પ્રશ્નમેકં તદ્વક્તુમર્હસિ ॥ ૭૪.૨॥

ભૂમિપ્રમાણસંસ્થાનં પર્વતાનાં ચ વિસ્તરમ્ ।
સમુદ્રાણાં નદીનાં ચ બ્રહ્માણ્ડસ્ય ચ વિસ્તરમ્ ।
અસ્માકં બ્રૂહિ કૃપયા દેવદેવ ઉમાપતે ॥ ૭૪.૩॥

રુદ્ર ઉવાચ ।
સર્વેષ્વેવ પુરાણેષુ ભૂર્લોકઃ પરિકીર્ત્યતે ।
બ્રહ્મવિષ્ણુભવાદીનાં વાયવ્યે ચ સવિસ્તરમ્ ॥ ૭૪.૪॥

ઇદાનીં ચ પ્રવક્ષ્યામિ સમાસાદ્વઃ ક્ષમાન્તરમ્ ।
તન્નિબોધત ધર્મજ્ઞા ગદતો મમ સત્તમાઃ ॥ ૭૪.૫॥

યોઽસૌ સકલવિદ્યાવબોધિતપરમાત્મરૂપી વિગતકલ્મષઃ
પરમાણુરચિન્ત્યાત્મા નારાયણઃ સકલલોકાલોકવ્યાપી
પીતામ્બરોરુવક્ષઃ ક્ષિતિધરો ગુણતોમુખ્યતસ્તુ -
અણુમહદ્દીર્ઘહ્રસ્વમકૃશમલોહિતમિત્યેવમાદ્યોપલક્ષિત -
વિજ્ઞાનમાત્રરૂપમ્ । સ ભગવાંસ્ત્રિપ્રકારઃ સત્ત્વરજસ્તમોદ્રિક્તઃ

સલિલં સસર્જ । તચ્ચ સૃષ્ટ્વાનાદિપુરુષઃ પરમેશ્વરો નારાયણઃ
સકલજગન્મયઃ સર્વમયો દેવમયો યજ્ઞમય આપોમય
આપોમૂર્ત્તિર્યોગનિદ્રયા સુપ્તસ્ય તસ્ય નાભૌ તદબ્જં નિઃસસાર ।
તસ્મિન્સકલવેદનિધિરચિન્ત્યાત્મા પરમેશ્વરો બ્રહ્મા પ્રજાપતિ-
રભવત્ સ ચ સનકસનન્દનસનત્કુમારાદીન્ જ્ઞાનધર્મિણઃ
પૂર્વમુત્પાદ્ય પશ્ચાન્મનું સ્વાયમ્ભુવં મરીચ્યાદીન્ દક્ષાન્તાન્ સસર્જ ।
યઃ સ્વાયમ્ભુવો મનુર્ભગવતા સૃષ્ટસ્તસ્માદારભ્ય ભુવનસ્યાતિવિસ્તરો
વર્ણ્યતે । તસ્ય ચ મનોર્દ્વૌ પુત્રૌ બભૂવતુઃ પ્રિયવ્રતોત્તાનપાદૌ ।
પ્રિયવ્રતસ્ય દશ પુત્રા બભૂવુઃ । આગ્નીધ્રોઽગ્નિબાહુર્મેધો મેધાતિથિર્ધ્રુવો
જ્યોતિષ્માન્ દ્યુતિમાન્ હવ્યવપુષ્મત્સવનાન્તાઃ ।
સ ચ પ્રિયવ્રતઃ સપ્તદ્વીપેષુ સપ્ત પુત્રાન્ સ્થાપયામાસ ।
તત્ર ચાગ્નીધ્રં જમ્બૂદ્વીપેશ્વરં ચક્રે ।
શાકદ્વીપેશ્વરં મેધાતિથિં કુશે જ્યોતિષ્મન્તં ક્રૌઞ્ચે દ્યુતિમન્તં
શાલ્મલે વપુષ્મન્તં ગોમેદસ્યેશ્વરં હવ્યં પુષ્કરાધિપતિં સવનમિતિ ।
પુષ્કરેશસ્યાપિ સવનસ્ય દ્વૌ પુત્રૌ મહાવીતધાતકી ભવેતામ્ ॥

તયોર્દેશૌ ગોમેદશ્ચ નામ્ના વ્યવસ્થિતૌ ।
ધાતકેર્ધાતકીખણ્ડં કુમુદસ્ય ચ કૌમુદમ્ ।
શાલ્મલાધિપતેરપિ વપુષ્મન્તસ્ય ત્રયઃ પુત્રાઃ સકુશવૈદ્યુતજીમૂતનામાનઃ ।
સકુશસ્ય સકુશનામા દેશઃ વૈદ્યુતસ્ય વૈદ્યુતઃ ।
જીમૂતસ્ય જીમૂત ઇતિ એતે શાલ્મલેર્દેશા ઇતિ તથા ચ દ્યુતિમતઃ સપ્ત
પુત્રકાઃ કુશલો મનુગોષ્ઠૌષ્ણઃ પીવરોધાન્ધકારકમુનિદુન્દુભિશ્ચેતિ ।
તન્નામ્ના ક્રૌઞ્ચે સપ્ત મહાદેશનામાનિ ।
કુશદ્વીપેશ્વરસ્યાપિ જ્યોતિષ્મતઃ સપ્તૈવ પુત્રાસ્તદ્યથા
ઉદ્ભિદો વેણુમાંશ્ચૈવ રથોપલમ્બનો ધૃતિઃ પ્રભાકરઃ કપિલ ઇતિ ।
તન્નામાન્યેવ વર્ષાણિ દ્રષ્ટવ્યાનિ ।
શાકાધિપસ્યાપિ સપ્ત પુત્રા મેધાતિથેસ્તદ્યથા
શાન્તભયશિશિરસુખોદયનન્દશિવક્ષેમકધ્રુવા ઇતિ ।
એતે સપ્ત પુત્રાઃ એતન્નામાન્યેવ વર્ષાણિ ।
અથ જમ્બૂદ્વીપેશ્વરસ્યાપિ આગ્નીધ્રસ્ય નવ પુત્રા બભૂવુઃ ।
તદ્યથા નાભિઃ કિમ્પુરુષો હરિવર્ષ ઇલાવૃતો રમ્યકો
હિરણ્મયઃ કુરુર્ભદ્રાશ્વઃ કેતુમાલશ્ચેતિ । એતન્નામાન્યેવ વર્ષાણિ ।

નાભેર્હેમવન્તં હેમકૂટં કિમ્પુરુષં નૈષધં હરિવર્ષં
મેરુમધ્યમિલાવૃત્તં નીલં રમ્યકં શ્વેતં હિરણ્મયં
ઉત્તરં ચ શૃઙ્ગવતઃ કુરવો માલ્યવન્તં ભદ્રાશ્વં
ગન્ધમાદનં કેતુમાલમિતિ । એવં સ્વાયમ્ભુવેઽન્તરે ભુવનપ્રતિષ્ઠા ।
કલ્પે કલ્પે ચૈવમેવ સપ્ત સપ્ત પાર્થિવૈઃ ક્રિયતે ભૂમેઃ પાલનં
વ્યવસ્થા ચ । એષ સ્વભાવઃ કલ્પસ્ય સદા ભવતીતિ ।
અત્ર નાભેઃ સર્ગં કથયામિ । નાભિર્મેરુદેવ્યાં પુત્રમજનયદ્-
ઋષભનામાનમ્ । તસ્ય ભરતો જજ્ઞે પુત્રશ્ચ તાવદગ્રજઃ ।
તસ્ય ભરતસ્ય પિતા ઋષભો હિમાદ્રેર્દક્ષિણં વર્ષમદાદ્ભારતં નામ ।
ભરતસ્યાપિ પુત્રઃ સુમતિર્નામા ।
તસ્ય રાજ્યં દત્ત્વા ભરતોઽપિ વનં યયૌ ।
સુમતેસ્તેજસ્તત્પુત્રઃ સત્સુર્નામા । તસ્યાપીન્દ્રદ્યુમ્નો નામ ।
તસ્યાપિ પરમેષ્ઠી તસ્યાપિ પ્રતિહર્ત્તા તસ્ય નિખાતઃ
નિખાતસ્ય ઉન્નેતા ઉન્નેતુરપ્યભાવસ્તસ્યોદ્ગાતા તસ્ય
પ્રસ્તોતા પ્રસ્તોતુશ્ચ વિભુઃ વિભોઃ પૃથુઃ પૃથોરનન્તઃ
અનન્તસ્યાપિ ગયઃ ગયસ્ય નયસ્તસ્ય વિરાટઃ ।
તસ્યાપિ મહાવીર્યસ્તતઃ સુધીમાન્ ધીમતો મહાન્
મહતો ભૌમનો ભૌમનસ્ય ત્વષ્ટા ત્વષ્ટુર્વિરજાઃ
તસ્ય રાજો રાજસ્ય શતજિત્ ।
તસ્ય પુત્રશતં જજ્ઞે તેનેમા વર્દ્ધિતાઃ પ્રજાઃ ।
તૈરિદં ભારતં વર્ષં સપ્તદ્વીપં સમાહ્વિતમ્ ॥ ૭૪.૬॥

તેષાં વંશપ્રસૂત્યા તુ ભુક્તેયં ભારતી પ્રજા ।
કૃતત્રેતાદિયુક્ત્યા તુ યુગાખ્યા હ્યેકસપ્તતિઃ ॥ ૭૪.૭॥

ભુવનસ્ય પ્રસઙ્ગેન મન્વન્તરમિદં શુભમ્ ।
સ્વાયમ્ભુવં ચ કથિતં મનોર્દ્વીપાન્નિબોધત ॥ ૭૪.૮॥

॥ ઇતિ શ્રીવરાહપુરાણે ભગવચ્છાસ્ત્રે ચતુઃસપ્તતિતમોઽધ્યાયઃ ॥ ૭૪॥

## શ્રીવરાહપુરાણે પઞ્ચસપ્તતિતમોઽધ્યાયઃ

રુદ્ર ઉવાચ ।
અત ઊર્ધ્વં પ્રવક્ષ્યામિ જમ્બૂદ્વીપં યથાતથમ્ ।

સઙ્ખ્યાં ચાપિ સમુદ્રાણાં દ્વીપાનાં ચૈવ વિસ્તરમ્ ॥ ૭૫.૧॥

યાવન્તિ ચૈવ વર્ષાણિ તેષુ નદ્યશ્ચ યાઃ સ્મૃતાઃ ।
મહાભૂતપ્રમાણં ચ ગતિં ચન્દ્રાર્કયોઃ પૃથક્ ॥ ૭૫.૨॥

દ્વીપભેદસહસ્રાણિ સપ્તસ્વન્તર્ગતાનિ ચ ।
ન શક્યન્તે ક્રમેણેહ વક્તું યૈર્વિતતં જગત્ ॥ ૭૫.૩॥

સપ્તદ્વીપાન્ પ્રવક્ષ્યામિ ચન્દ્રાદિત્યગ્રહૈઃ સહ ।
યેષાં મનુષ્યાસ્તર્કેણ પ્રમાણાનિ પ્રચક્ષતે ॥ ૭૫.૪॥

અચિન્ત્યાઃ ખલુ યે ભાવા ન તાંસ્તર્કેણ સાધયેત્ ।
પ્રકૃતિભ્યઃ પરં યચ્ચ તદચિન્ત્યં વિભાવ્યતે ॥ ૭૫.૫॥

નવ વર્ષં પ્રવક્ષ્યામિ જમ્બૂદ્વીપં યથાતથમ્ ।
વિસ્તરાન્મણ્ડલાચ્ચૈવ યોજનૈસ્તન્નિબોધત ॥ ૭૫.૬॥

શતમેકં સહસ્રાણાં યોજનાનાં સમન્તતઃ ।
નાનાજનપદાકીર્ણં યોજનૈર્વિવિધૈઃ શુભૈઃ ॥ ૭૫.૭॥

સિદ્ધચારણસઙ્કીર્ણં પર્વતૈરુપશોભિતમ્ ।
સર્વધાતુવિવૃદ્ધૈશ્ચ શિલાજાલસમુદ્ભવૈઃ ।
પર્વતપ્રભવાભિશ્ચ નદીભિઃ સર્વતશ્ચિતમ્ ॥ ૭૫.૮॥

જમ્બૂદ્વીપઃ પૃથુઃ શ્રીમાન્ સર્વતઃ પરિમણ્ડલઃ ।
નવભિશ્ચાવૃતઃ શ્રીમાન્ ભુવનૈર્ભૂતભાવનઃ ॥ ૭૫.૯॥

લવણેન સમુદ્રેણ સર્વતઃ પરિવારિતઃ ।
જમ્બૂદ્વીપસ્ય વિસ્તારાત્ સમેન તુ સમન્તતઃ ॥ ૭૫.૧૦॥

તસ્ય પ્રાગાયતા દીર્ઘા ષડેતે વર્ષપર્વતાઃ ।
ઉભયત્રાવગાઢાશ્ચ સમુદ્રૌ પૂર્વપશ્ચિમૌ ॥ ૭૫.૧૧॥

હિમપ્રાયશ્ચ હિમવાન્ હેમકૂટશ્ચ હેમવાન્ ।
સર્વત્ર સુસુખશ્ચાપિ નિષધઃ પર્વતો મહાન્ ॥ ૭૫.૧૨॥

ચતુર્વર્ણઃસ સૌવર્ણો મેરુશ્ચોલ્બમયો ગિરિઃ ।
વૃત્તાકૃતિપ્રમાણશ્ચ ચતુરસ્રઃ સમુચ્છ્રિતઃ ॥ ૭૫.૧૩॥

નાનાવર્ણસ્તુ પાર્શ્વેષુ પ્રજાપતિગુણાન્વિતઃ ।
નાભિમણ્ડલસમ્ભૂતો બ્રહ્મણઃ પરમેષ્ઠિનઃ ॥ ૭૫.૧૪॥

પૂર્વતઃ શ્વેતવર્ણસ્તુ બ્રહ્મણ્યં તેન તસ્ય તત્ ।
પીતશ્ચ દક્ષિણેનાસૌ તેન વૈશ્યત્વમિષ્યતે ॥ ૭૫.૧૫॥

ભૃઙ્ગપત્રનિભશ્ચાસૌ પશ્ચિમેન યતોઽથ સઃ ।
તેનાસ્ય શૂદ્રતા પ્રોક્તા મેરોર્નામાર્થકર્મણઃ ॥ ૭૫.૧૬॥

પાર્શ્વમુત્તરતસ્તસ્ય રક્તવર્ણં વિભાવ્યતે ।
તેનાસ્ય ક્ષત્રભાવઃ સ્યાદિતિ વર્ણાઃ પ્રકીર્તિતાઃ ॥ ૭૫.૧૭॥

વૃત્તઃ સ્વભાવતઃ પ્રોક્તો વર્ણતઃ પરિમાણતઃ ।
નીલશ્ચ વૈદૂર્યમયઃ શ્વેતશુક્લો હિરણ્મયઃ ।
મયૂરબર્હિવર્ણસ્તુ શાતકૌમ્ભશ્ચ શ઼ૃઙ્ગવાન્ ॥ ૭૫.૧૮॥

એતે પર્વતરાજાનઃ સિદ્ધચારણસેવિતાઃ ।
તેષામન્તરવિષ્કમ્ભો નવસાહસ્ર ઉચ્યતે ॥ ૭૫.૧૯॥

મધ્યે ત્વિલાવૃતં નામ મહામેરોઃ સ સમ્ભવઃ ।
નવૈવ તુ સહસ્રાણિ વિસ્તીર્ણઃ સર્વતશ્ચ સઃ ॥ ૭૫.૨૦॥

મધ્યં તસ્ય મહામેરુર્વિધૂમ ઇવ પાવકઃ ।
વેદ્યર્દ્ધં દક્ષિણં મેરોરુત્તરાર્દ્ધં તથોત્તરમ્ ॥ ૭૫.૨૧॥

વર્ષાણિ યાનિ ષડત્ર તેષાં તે વર્ષપર્વતાઃ ।
યોજનાગ્રં તુ વર્ષાણાં સર્વેષાં તદ્વિધીયતે ॥ ૭૫.૨૨॥

દ્વે દ્વે વર્ષે સહસ્રાણાં યોજનાનાં સમુચ્છ્રયઃ ।
જમ્બૂદ્વીપસ્ય વિસ્તારસ્તેષામાયામ ઉચ્યતે ॥ ૭૫.૨૩॥

યોજનાનાં સહસ્રાણિ શતૌ દ્વૌ ચાયતૌ ગિરી ।
નીલશ્ચ નિષધશ્ચૈવ તાભ્યાં હીનાશ્ચ યે પરે ।
શ્વેતશ્ચ હેમકૂટશ્ચ હિમવાઞ્છૃઙ્ગવાંશ્ચ યઃ ॥ ૭૫.૨૪॥

જમ્બૂદ્વીપપ્રમાણેન નિષધઃ પરિકીર્તિતઃ ।
તસ્માદ્દ્વાદશભાગેન હેમકૂટઃ પ્રહીયતે ।
હિમવાન્ વિંશભાગેન હેમકૂટાત્ પ્રહીયતે ॥ ૭૫.૨૫॥

અષ્ટાશીતિસહસ્રાણિ હેમકૂટો મહાગિરિઃ ।
અશીતિર્હિમવાન્ શૈલ આયતઃ પૂર્વપશ્ચિમે ॥ ૭૫.૨૬॥

દ્વીપસ્ય મણ્ડલીભાવાદ્ધ્રાસવૃદ્ધી પ્રકીર્ત્યતે ।
વર્ષાણાં પર્વતાનાં ચ યથા ચેમે તથોત્તરમ્ ॥ ૭૫.૨૭॥

તેષાં મધ્યે જનપદાસ્તાનિ વર્ષાણિ ચૈવ તત્ ।
પ્રપાતવિષમૈસ્તૈસ્તુ પર્વતૈરાવૃતાનિ તુ ॥ ૭૫.૨૮॥

સન્તતાનિ નદીભેદૈરગમ્યાનિ પરસ્પરમ્ ।
વસન્તિ તેષુ સત્ત્વાનિ નાનાજાતીનિ સર્વશઃ ॥ ૭૫.૨૯॥

એતદ્ધૈમવતં વર્ષં ભારતી યત્ર સન્તતિઃ ।
હેમકૂટં પરં યત્ર નામ્ના કિમ્પુરુષોત્તમઃ ॥ ૭૫.૩૦॥

હેમકૂટાત્ તુ નિષધં હરિવર્ષં તદુચ્યતે ।
હરિવર્ષાત્ પરં ચૈવ મેરુપાર્શ્વ ઇલાવૃતમ્ ॥ ૭૫.૩૧॥

ઇલાવૃતાત્ પરં નીલં રમ્યકં નામ વિશ્રુતમ્ ।
રમ્યકાચ્ચ પરં શ્વેતં વિશ્રુતં તદ્ધિરણ્મયમ્ ।
હિરણ્મયાત્ પરં ચૈવ શૃઙ્ગવન્તં કુરુઃ સ્મૃતમ્ ॥ ૭૫.૩૨॥

ધનુઃસંસ્થે તુ દ્વે વર્ષે વિજ્ઞેયે દક્ષિણોત્તરે ।
દ્વીપાનિ ખલુ ચત્વારિ ચતુરસ્રમિલાવૃતમ્ ॥ ૭૫.૩૩॥

અર્વાક્ચ નિષધસ્યાથ વેદ્યર્ધં દક્ષિણં સ્મૃતમ્ ।
પરં શૃઙ્ગવતો યચ્ચ વેદ્યર્ધં હિ તદુત્તરમ્ ॥ ૭૫.૩૪॥

વેદ્યર્દ્ધે દક્ષિણે ત્રીણિ વર્ષાણિ ત્રીણિ ચોત્તરે ।
તયોર્મધ્યે તુ વિજ્ઞેયો યત્ર મેરુસ્ત્વિલાવૃતઃ ॥ ૭૫.૩૫॥

દક્ષિણેન તુ નીલસ્ય નિષધસ્યોત્તરેણ ચ ।
ઉદગાયતો મહાશૈલો માલ્યવાન્નામ પર્વતઃ ॥ ૭૫.૩૬॥

યોજનાનાં સહસ્રે દ્વે વિષ્કમ્ભોચ્છ્રય એવ ચ ।
આયામતશ્ચતુસ્ત્રિંશત્ સહસ્રાણિ પ્રકીર્તિતઃ ॥ ૭૫.૩૭॥

તસ્ય પ્રતીચ્યાં વિજ્ઞેયઃ પર્વતો ગન્ધમાદનઃ ।
આયામોચ્છ્રયવિસ્તારાત્ તુલ્યો માલ્યવતા તુ સઃ ॥ ૭૫.૩૮॥

પરિમણ્ડલસ્તયોર્મધ્યે મેરુઃ કનકપર્વતઃ ।
ચતુર્વર્ણઃ સસૌવર્ણશ્ચતુરસ્રઃ સમુચ્છ્રિતઃ ॥ ૭૫.૩૯॥

અવ્યક્તા ધાતવઃ સર્વે સમુત્પન્ના જલાદયઃ ।

અવ્યક્તાત્ પૃથિવીપદ્મં મેરુસ્તસ્ય ચ કર્ણિકા ॥ ૭૫.૪૦॥

ચતુષ્પત્રં સમુત્પન્નં વ્યક્તં પઞ્ચગુણં મહત્ ।
તતઃ સર્વાઃ સમુદ્ભૂતા વિતતા હિ પ્રવૃત્તયઃ ॥ ૭૫.૪૧॥

અનેકકલ્પજીવદ્ભિઃ પુરુષૈઃ પુણ્યકારિભિઃ ।
કૃતાત્મભિર્મહાત્મભિઃ પ્રાપ્યતે પુરુષોત્તમઃ ॥ ૭૫.૪૨॥

મહાયોગી મહાદેવો જગદ્ધ્યેયો જનાર્દનઃ ।
સર્વલોકગતોઽનન્તો વ્યાપકો મૂર્ત્તિરવ્યયઃ ॥ ૭૫.૪૩॥

ન તસ્ય પ્રાકૃતા મૂર્તિર્માંસમેદોઽસ્થિસમ્ભવા ।
યોગિત્વાચ્ચેશ્વરત્વાચ્ચ સત્ત્વરૂપધરો વિભુઃ ॥ ૭૫.૪૪॥

તન્નિમિત્તં સમુત્પન્નં લોકે પદ્મં સનાતનમ્ ।
કલ્પશેષસ્ય તસ્યાદૌ કાલસ્ય ગતિરીદૃશી ॥ ૭૫.૪૫॥

તસ્મિન્ પદ્મે સમુત્પન્નો દેવદેવશ્ચતુર્મુખઃ ।
પ્રજાપતિપતિર્દેવ ઈશાનો જગતઃ પ્રભુઃ ॥ ૭૫.૪૬॥

તસ્ય બીજનિસર્ગં હિ પુષ્કરસ્ય યથાર્થવત્ ।
કૃત્સ્નં પ્રજાનિસર્ગેણ વિસ્તરેણૈવ વર્ણ્યતે ॥ ૭૫.૪૭॥

તદમ્બુ વૈષ્ણવઃ કાયો યતો રત્નવિભૂષિતઃ ।
પદ્માકારા સમુત્પન્ના પૃથિવી સવનદ્રુમા ॥ ૭૫.૪૮॥

તત્ તસ્ય લોકપદ્મસ્ય વિસ્તરં સિદ્ધભાષિતમ્ ।
વર્ણ્યમાનં વિભાગેન ક્રમશઃ શ‍ૃણુત દ્વિજાઃ ॥ ૭૫.૪૯॥

મહાવર્ષાણિ ખ્યાતાનિ ચત્વાર્યત્ર ચ સંસ્થિતાઃ ।
તત્ર પર્વતસંસ્થાનો મેરુર્નામ મહાબલઃ ॥ ૭૫.૫૦॥

નાનાવર્ણઃ સ પાર્શ્વેષુ પૂર્વતઃ શ્વેત ઉચ્યતે ।
પીતં ચ દક્ષિણં તસ્ય ભૃઙ્ગવર્ણં તુ પશ્ચિમમ્ ॥ ૭૫.૫૧॥

ઉત્તરં રક્તવર્ણં તુ તસ્ય પાર્શ્વં મહાત્મનઃ ।
મેરુસ્તુ શોભતે શુક્લો રાજવંશે તુ ધિષ્ઠિતઃ ॥ ૭૫.૫૨॥

તરુણાદિત્યસઙ્કાશો વિધૂમ ઇવ પાવકઃ ।
યોજનાનાં સહસ્રાણિ ચતુરાશીતિરુચ્છ્રિતઃ ॥ ૭૫.૫૩॥

પ્રવિષ્ટઃ ષોડશાધસ્તાદ્વિસ્તૃતઃ ષોડશૈવ તુ ।
શરાવસંસ્થિતત્વાચ્ચ દ્વાત્રિંશન્મૂર્ધ્નિ વિસ્તૃતઃ ॥ ૭૫.૫૪॥

વિસ્તારસ્ત્રિગુણશ્ચાસ્ય પરિણાહઃ સમન્તતઃ ।
મણ્ડલેન પ્રમાણેન વ્યસ્યમાનં તદિષ્યતે ॥ ૭૫.૫૫॥

નવતિશ્ચ સહસ્રાણિ યોજનાનાં સમન્તતઃ ।
તતઃ ષટ્કાધિકાનાં ચ વ્યસ્યમાનં પ્રકીર્ત્તિતમ્ ।
ચતુરસ્રેણ માનેન પરિણાહઃ સમન્તતઃ ॥ ૭૫.૫૬॥

સ પર્વતો મહાદિવ્યો દિવ્યૌષધિસમન્વિતઃ ।
સ વનૈરાવૃતઃ સર્વો જાતરૂપમયૈઃ શુભૈઃ ॥ ૭૫.૫૭॥

તત્ર દેવગણાઃ સર્વે ગન્ધર્વોરગરાક્ષસાઃ ।
શૈલરાજે પ્રમોદન્તે તથૈવાપ્સરસાં ગણાઃ ॥ ૭૫.૫૮॥

સ તુ મેરુઃ પરિવૃતો ભવનૈર્ભૂતભાવનૈઃ ।
ચત્વારો યસ્ય દેશાસ્તુ નાનાપાર્શ્વેષુ ધિષ્ઠિતાઃ ॥ ૭૫.૫૯॥

ભદ્રાશ્વો ભારતશ્ચૈવ કેતુમાલશ્ચ પશ્ચિમે ।
ઉત્તરે કુરવશ્ચૈવ કૃતપુણ્યપ્રતિશ્રયાઃ ॥ ૭૫.૬૦॥

કર્ણિકા તસ્ય પદ્મસ્ય સમન્તાત્ પરિમણ્ડલા ।
યોજનાનાં સહસ્રાણિ યોજનાનાં પ્રમાણતઃ ॥ ૭૫.૬૧॥

તસ્ય કેસરજાલાનિ નવષટ્ ચ પ્રકીર્ત્તિતાઃ ।
ચતુરશીતિરુત્સેધો વિવરાન્તરગોચરાઃ ॥ ૭૫.૬૨॥

ત્રિંશચ્ચાપિ સહસ્રાણિ યોજનાનાં પ્રમાણતઃ ।
તસ્ય કેસરજાલાનિ વિકીર્ણાનિ સમન્તતઃ ॥ ૭૫.૬૩॥

શતસાહસ્રમાયામમશીતિઃ પૃથુલાનિ ચ ।
ચત્વારિ તત્ર પર્ણાનિ યોજનાનાં ચતુર્દશ ॥ ૭૫.૬૪॥

તત્ર યા સા મયા તુભ્યં કર્ણિકેત્યભિવિશ્રુતા ।
તાં વર્ણ્યમાનામેકાગ્ર્યાત્ સમાસેન નિબોધત ।
મણિપર્ણશતૈશ્ચિત્રાં નાનાવર્ણપ્રભાસિતામ્ ॥ ૭૫.૬૫॥

અનેકપર્ણનિચયં સૌવર્ણમરુણપ્રભમ્ ।
કાન્તં સહસ્રપર્વાણં સહસ્રોદરકન્દરમ્ ।

સહસ્રશતપત્રં ચ વૃત્તમેકં નગોત્તમમ્ ॥ ૭૫.૬૬॥

મણિરત્નાર્પિતૈઃ શ્વભ્રૈર્મણિભિશ્ચિત્રવેદિકૈઃ ।
સુવર્ણમણિચિત્રાઙ્ગૈર્મણિચર્ચિતતોરણૈઃ ॥ ૭૫.૬૭॥

તત્ર બ્રહ્મસભા રમ્યા બ્રહ્મર્ષિજનસઙ્કુલા ।
નામ્ના મનોવ્રતી નામ સર્વલોકેષુ વિશ્રુતા ॥ ૭૫.૬૮॥

તત્રેશાનસ્ય દેવસ્ય સહસ્રાદિત્યવર્ચસઃ ।
મહાવિમાનસંસ્થસ્ય મહિમા વર્ત્તતે સદા ॥ ૭૫.૬૯॥

તત્ર સર્વે દેવગણાશ્ચતુર્વક્ત્રં સ્વયમ્પ્રભુમ્ ।
ઇષ્ટ્વા પૂજ્યનમસ્કારૈરર્ચનીયમુપસ્થિતાઃ ॥ ૭૫.૭૦॥

યૈસ્તદા જિતસઙ્કલ્પૈર્બ્રહ્મચર્યં મહાત્મભિઃ ।
ચીર્ણં ચારુમનોભિશ્ચ સદાચારપથિ સ્થિતૈઃ ॥ ૭૫.૭૧॥

સમ્યગિષ્ટ્વા ચ ભુક્ત્વા ચ પિતૃદેવાર્ચને રતાઃ ।
ગૃહાશ્રમપરાસ્તત્ર વિનીતા અતિથિપ્રિયાઃ ॥ ૭૫.૭૨॥

ગૃહિણઃ શુક્લકર્મસ્થા વિરક્તાઃ કારણાત્મકાઃ ।
યમૈર્નિયમદાનૈશ્ચ દૃઢનિર્દગ્ધકિલ્બિષાઃ ॥ ૭૫.૭૩॥

તેષાં નિવસનં શુક્લબ્રહ્મલોકમનિન્દિતમ્ ।
ઉપર્યુપરિ સર્વાસાં ગતીનાં પરમા ગતિઃ ।
ચતુર્દશસહસ્રાણિ યોજનાનાં તુ કીર્ત્તિતમ્ ॥ ૭૫.૭૪॥

તતોર્દ્ધ્વરુચિરે કૃષ્ણે તરુણાદિત્યવર્ચસિ ।
મહાગિરૌ તતો રમ્યે રત્નધાતુવિચિત્રિતે ॥ ૭૫.૭૫॥

નૈકરત્નસમાવાસે મણિતોરણમન્દિરે ।
મેરોઃ સર્વેષુ પાર્શ્વેષુ સમન્તાત્ પરિમણ્ડલે ॥ ૭૫.૭૬॥

ત્રિંશદ્યોજનસાહસ્રં ચક્રપાદો નગોત્તમઃ ।
જારુધિશ્ચૈવ શૈલેન્દ્ર ઇત્યેતે ઉત્તરાઃ સ્મૃતાઃ ॥ ૭૫.૭૭॥

એતેષાં શૈલમુખ્યાનામુત્તરેષુ યથાક્રમઃ ।
સ્થલીરન્તરદ્રોણ્યશ્ચ સરાંસિ ચ નિબોધત ॥ ૭૫.૭૮॥

દશયોજનવિસ્તીર્ણા ચક્રપાદોપનિર્ગતા ।
સા તૂર્દ્ધ્વવાહિની ચાપિ નદી ભૂમૌ પ્રતિષ્ઠિતા ॥ ૭૫.૭૯॥

સા પુર્યામમરાવત્યાં ક્રમમાણેન્દુસપ્રભા ।
તયા તિરસ્કૃતા વાઽપિ સૂર્યેન્દુજ્યોતિષાં ગણાઃ ॥ ૭૫.૮૦॥

ઉદયાસ્તમિતે સન્ધ્યે યે સેવન્તે દ્વિજોત્તમાઃ ।
તાન્ તુષ્યન્તે દ્વિજાઃ સર્વાનષ્ટાવપ્યચલોત્તમાન્ ॥ ૭૫.૮૧॥

પરિભ્રમજ્જ્યોતિષાં યા સા રુદ્રેન્દ્રમતા શુભા ॥ ૭૫.૮૨॥

॥ ઇતિ શ્રીવરાહપુરાણે ભગવચ્છાસ્ત્રે પઞ્ચસપ્તતિતમોઽધ્યાયઃ ॥ ૭૫॥

## શ્રીવરાહપુરાણે ષટ્સપ્તતિતમોઽધ્યાયઃ

રુદ્ર ઉવાચ ।
તસ્યૈવ મેરોઃ પૂર્વે તુ દેશે પરમવર્ચસે ।
ચક્રપાદપરિક્ષિપ્તે નાનાધાતુવિરાજિતે ॥ ૭૬.૧॥

તત્ર સર્વામરપુરં ચક્રપાદસમુદ્ધતમ્ ।
દુર્ધર્ષં બલદૃપ્તાનાં દેવદાનવરક્ષસામ્ ।
તત્ર જામ્બૂનદમયઃ સુપ્રાકારઃ સુતોરણઃ ॥ ૭૬.૨॥

તસ્યાપ્યુત્તરપૂર્વે તુ દેશે પરમવર્ચસે ।
અલોકજનસમ્પૂર્ણા વિમાનશતસઙ્કુલા ॥ ૭૬.૩॥

મહાવાપિસમાયુક્તા નિત્યં પ્રમુદિતા શુભા ।
શોભિતા પુષ્પશબલૈઃ પતાકાધ્વજમાલિની ॥ ૭૬.૪॥

દેવૈર્યક્ષોઽપ્સરોભિશ્ચ ઋષિભિશ્ચ સુશોભિતા ।
પુરન્દરપુરી રમ્યા સમૃદ્ધા ત્વમરાવતી ॥ ૭૬.૫॥

તસ્યા મધ્યેઽમરાવત્યા વજ્રવૈદૂર્યવેદિકા ।
ત્રૈલોક્યગુણવિખ્યાતા સુધર્મા નામ વૈ સભા ॥ ૭૬.૬॥

તત્રાસ્તે શ્રીપતેઃ શ્રીમાન્ સહસ્રાક્ષઃ શચીપતિઃ ।
સિદ્ધાદિભિઃ પરિવૃતઃ સર્વાભિર્દેવયોનિભિઃ ॥ ૭૬.૭॥

તત્ર ચૈવ સુવંશઃ સ્યાદ્ભાસ્કરસ્ય મહાત્મનઃ ।
સાક્ષાત્ તત્ર સુરાધ્યક્ષઃ સર્વદેવનમસ્કૃતઃ ॥ ૭૬.૮॥

તસ્યાશ્ચ દિક્ષુ વિસ્તીર્ણા તત્તદ્ગુણસમન્વિતા ।

તેજોવતી નામ પુરી હુતાશસ્ય મહાત્મનઃ ॥ ૭૬.૯॥

તત્તદ્ગુણવતી રમ્યા પુરી વૈવસ્વતસ્ય ચ ।
નામ્ના સંયમની નામ પુરી ત્રૈલોક્યવિશ્રુતા ॥ ૭૬.૧૦॥

તથા ચતુર્થે દિગ્ભાગે નૈરૃતાધિપતેઃ શુભા ।
નામ્ના કૃષ્ણાવતી નામ વિરૂપાક્ષસ્ય ધીમતઃ ॥ ૭૬.૧૧॥

પઞ્ચમે હ્યુત્તરપુટે નામ્ના શુદ્ધવતી પુરી ।
ઉદકાધિપતેઃ ખ્યાતા વરુણસ્ય મહાત્મનઃ ॥ ૭૬.૧૨॥

તથા પઞ્ચોત્તરે દેવસ્વસ્યોત્તરપુટે પુરી ।
વાયોર્ગન્ધવતી નામ ખ્યાતા સર્વગુણોત્તરા ॥ ૭૬.૧૩॥

તસ્યોત્તરપુટે રમ્યા ગુહ્યકાધિપતેઃ પુરી ।
નામ્ના મહોદયા નામ શુભા વૈદૂર્યવેદિકા ॥ ૭૬.૧૪॥

તથાષ્ટમેઽન્તરપુટે ઈશાનસ્ય મહાત્મનઃ ।
પુરી મનોહરા નામ ભૂતૈર્નાનાવિધૈર્યુતા ।
પુષ્પૈર્ધન્યૈશ્ચ વિવિધૈર્વનૈરાશ્રમસંસ્થિતૈઃ ॥ ૭૬.૧૫॥

પ્રાર્થ્યતે દેવલોકોઽયં સ સ્વર્ગ ઇતિ કીર્તિતઃ ॥ ૭૬.૧૬॥

॥ ઇતિ શ્રીવરાહપુરાણે ભગવચ્છાસ્ત્રે ષટ્સપ્તતિતમોઽધ્યાયઃ ॥ ૭૬॥

## શ્રીવરાહપુરાણે સપ્તસપ્તતિતમોઽધ્યાયઃ

રુદ્ર ઉવાચ ।
યદેતત્ કર્ણિકામૂલં મેરોર્મધ્યં પ્રકીર્તિતમ્ ।
તદ્યોજનસહસ્રાણિ સઙ્ખ્યયા માનતઃ સ્મૃતમ્ ॥ ૭૭.૧॥

ચત્વારિંશત્ તથા ચાષ્ટૌ સહસ્રાણિ તુ મણ્ડલૈઃ ।
શૈલરાજસ્ય તત્તત્ર મેરુમૂલમિતિ સ્મૃતમ્ ॥ ૭૭.૨॥

તેષાં ગિરિસહસ્રાણામનેકાનાં મહોચ્છ્રયઃ ।
દિગષ્ટૌ ચ પુનસ્તસ્ય મર્યાદાપર્વતાઃ શુભાઃ ॥ ૭૭.૩॥

જઠરો દેવકૂટશ્ચ પૂર્વસ્યાં દિશિ પર્વતૌ ।
પૂર્વપશ્ચાયતાવેતાવર્ણવાન્તર્વ્યવસ્થિતૌ ।
મર્યાદાપર્વતાનેતાનષ્ટાનાહુર્મનીષિણઃ ॥ ૭૭.૪॥

યોઽસૌ મેરુર્દ્વિજશ્રેષ્ઠાઃ પ્રોક્તઃ કનકપર્વતઃ ।
વિષ્કમ્ભાંસ્તસ્ય વક્ષ્યામિ શ‍ૃણુધ્વં ગદતસ્તુ તાન્ ॥ ૭૭.૫॥

મહાપાદાસ્તુ ચત્વારો મેરોરથ ચતુર્દિશમ્ ।
યૈર્ન ચચાલ વિષ્ટબ્ધા સપ્તદ્વીપવતી મહી ॥ ૭૭.૬॥

દશયોજનસાહસ્રં વ્યાયામસ્તેષુ શઙ્ક્યતે ।
તિર્યગૂર્ધ્વં ચ રચિતા હરિતાલતટૈર્વૃતાઃ ॥ ૭૭.૭॥

મનઃશિલાદરીભિશ્ચ સુવર્ણમણિચિત્રિતાઃ ।
અનેકસિદ્ધભવનૈઃ ક્રીડાસ્થાનૈશ્ચ સુપ્રભાઃ ॥ ૭૭.૮॥

પૂર્વેણ મન્દરસ્તસ્ય દક્ષિણે ગન્ધમાદનઃ ।
વિપુલઃ પશ્ચિમે પાર્શ્વે સુપાર્શ્વશ્ચોત્તરે સ્થિતઃ ॥ ૭૭.૯॥

તેષાં શ‍ૃઙ્ગેષુ ચત્વારો મહાવૃક્ષાઃ પ્રતિષ્ઠિતાઃ ।
દેવદૈત્યાપ્સરોભિશ્ચ સેવિતા ગુણસઞ્ચયૈઃ ॥ ૭૭.૧૦॥

મન્દરસ્ય ગિરેઃ શ‍ૃઙ્ગે કદમ્બો નામ પાદપઃ ।
પ્રલમ્બશાખાશિખરઃ કદમ્બશ્ચૈત્યપાદપઃ ॥ ૭૭.૧૧॥

મહાકુમ્ભપ્રમાણૈશ્ચ પુષ્પૈર્વિકચકેસરૈઃ ।
મહાગન્ધમનોજ્ઞૈશ્ચ શોભિતઃ સર્વકાલજૈઃ ॥ ૭૭.૧૨॥

સમાસેનાપરિવૃતો ભુવનૈર્ભૂતભાવનૈઃ ।
સહસ્રમધિકં સોઽથ ગન્ધેનાપૂરયન્ દિશઃ ॥ ૭૭.૧૩॥

ભદ્રાશ્વો નામ વૃક્ષોઽયં વર્ષાદ્રિઃ કેતુસમ્ભવઃ ।
કીર્તિમાન્ રૂપવાઞ્છ્રીમાન્ મહાપાદપપાદપઃ ।
યત્ર સાક્ષાદ્ધૃષીકેશઃ સિદ્ધસઙ્ઘૈર્નિષેવ્યતે ॥ ૭૭.૧૪॥

તસ્ય ભદ્રકદમ્બસ્ય તથાશ્વવદનો હરિઃ ।
પ્રાપ્તવાંશ્ચામરશ્રેષ્ઠઃ સ હિ સાનું પુનઃ પુનઃ ॥ ૭૭.૧૫॥

તેન ચાલોકિતં વર્ષં સર્વદ્વિપદનાયકાઃ ।
યસ્ય નામ્ના સમાખ્યાતો ભદ્રાશ્વેતિ ન સંશયઃ ॥ ૭૭.૧૬॥

દક્ષિણસ્યાપિ શૈલસ્ય શિખરે દેવસેવિતે ।
જમ્બૂસઙ્ઘઃ પુષ્પફલા મહાશાખોપશોભિતઃ ॥ ૭૭.૧૭॥

તસ્યા હ્યતિપ્રમાણાનિ સ્વાદૂનિ ચ મૃદૂનિ ચ ।
ફલાન્યમૃતકલ્પાનિ પતન્તિ ગિરિમૂર્ધનિ ॥ ૭૭.૧૮॥

તસ્માદ્ગિરિવરશ્રેષ્ઠાત્ ફલપ્રસ્યન્દવાહિની ।
દિવ્યા જામ્બૂનદી નામ પ્રવૃત્તા મધુવાહિની ॥ ૭૭.૧૯॥

તત્ર જામ્બૂનદં નામ સુવર્ણમનલપ્રભમ્ ।
દેવાલઙ્કારમતુલમુત્પન્નં પાપનાશનમ્ ॥ ૭૭.૨૦॥

દેવદાનવગન્ધર્વયક્ષરાક્ષસગુહ્યકાઃ ।
પપુસ્તદમૃતપ્રખ્યં મધુ જમ્બૂફલસ્રવમ્ ॥ ૭૭.૨૧॥

સા કેતુર્દક્ષિણે વર્ષે જમ્બૂલોકેતિ વિશ્રુતા ।
યસ્યા નામ્ના સમાખ્યાતા જમ્બૂદ્વીપેતિ માનવૈઃ ॥ ૭૭.૨૨॥

વિપુલસ્ય ચ શૈલસ્ય દક્ષિણેન મહાત્મનઃ ।
જાતઃ શૃઙ્ગેતિ સુમહાનશ્વત્થશ્ચેતિ પાદપઃ ॥ ૭૭.૨૩॥

મહોચ્છ્રાયો મહાસ્કન્ધો નૈકસત્ત્વગુણાલયઃ ।
કુમ્ભપ્રમાણૈ રુચિરૈઃ ફલૈઃ સર્વર્ત્તુકૈઃ શુભૈઃ ॥ ૭૭.૨૪॥

સ કેતુઃ કેતુમાલાનાં દેવગન્ધર્વસેવિતઃ ।
કેતુમાલેતિ વિખ્યાતો નામ્ના તત્ર પ્રકીર્તિતઃ ।
તન્નિબોધત વિપ્રેન્દ્રા નિરુક્તં નામકર્મણઃ ॥ ૭૭.૨૫॥

ક્ષીરોદમથને વૃત્તે માલા સ્કન્ધે નિવેશિતાઃ ।
ઇન્દ્રેણ ચૈત્યકેતોસ્તુ કેતુમાલસ્તતઃ સ્મૃતઃ ।
તેન તચ્ચિહ્નિતં વર્ષં કેતુમાલેતિ વિશ્રુતમ્ ॥ ૭૭.૨૬॥

સુપાર્શ્વસ્યોત્તરે શૃઙ્ગે વટો નામ મહાદ્રુમઃ ।
ન્યગ્રોધો વિપુલસ્કન્ધો યસ્ત્રિયોજનમણ્ડલઃ ॥ ૭૭.૨૭॥

માલ્યદામકલાપૈશ્ચ વિવિધૈસ્તુ સમન્તતઃ ।
શાખાભિર્લમ્બમાનાભિઃ શોભિતઃ સિદ્ધસેવિતઃ ॥ ૭૭.૨૮॥

પ્રલમ્બકુમ્ભસદૃશૈર્હેમવર્ણૈઃ ફલૈઃ સદા ।
સ હ્યુત્તરકુરૂણાં તુ કેતુવૃક્ષઃ પ્રકાશતે ॥ ૭૭.૨૯॥

સનત્કુમારાવરજા માનસા બ્રહ્મણઃ સુતાઃ ।
સપ્ત તત્ર મહાભાગાઃ કુરવો નામ વિશ્રુતાઃ ॥ ૭૭.૩૦॥

તત્ર સ્થિરગતૈર્જ્ઞાનૈર્વિરજસ્કૈર્મહાત્મભિઃ ।
અક્ષયઃ ક્ષયપર્યન્તો લોકઃ પ્રોક્તઃ સનાતનઃ ॥ ૭૭.૩૧॥

તેષાં નામાઙ્કિતં વર્ષં સપ્તાનાં વૈ મહાત્મનામ્ ।
દિવિ ચેહ ચ વિખ્યાતા ઉત્તરાઃ કુરવઃ સદા ॥ ૭૭.૩૨॥

॥ ઇતિ શ્રીવરાહપુરાણે ભગવચ્છાસ્ત્રે સપ્તસપ્તતિતમોઽધ્યાયઃ ॥ ૭૭॥

## શ્રીવરાહપુરાણે અષ્ટસપ્તતિતમોઽધ્યાયઃ

રુદ્ર ઉવાચ ।
તથા ચતુર્ણાં વક્ષ્યામિ શૈલેન્દ્રાણાં યથાક્રમમ્ ।
અનુવિન્દ્ધ્યાનિ રમ્યાણિ વિહઙ્ગૈઃ કૂજિતાનિ ચ ॥ ૭૮.૧॥

અનેકપક્ષિયુક્તાત્મશૃઙ્ગાણિ સુબહૂનિ ચ ।
દેવાનાં દિવ્યનારીભિઃ સમં ક્રીડામયાનિ ચ ॥ ૭૮.૨॥

કિન્નરોદ્ગીતઘુષ્ટાનિ શીતમન્દસુગન્ધિભિઃ ।
પવનૈઃ સેવ્યમાનાનિ રમણીયતરાણિ ચ ॥ ૭૮.૩॥

ચતુર્દિક્ષુ વિરાજન્તે નામતઃ શૃણુતાનઘાઃ ।
પૂર્વે ચૈત્રરથં નામ દક્ષિણે ગન્ધમાદનમ્ ।
પ્રભાવેણ સુતોયાનિ નવખણ્ડયુતાનિ ચ ॥ ૭૮.૪॥

વનષણ્ડાંસ્તથાઽઽક્રમ્ય દેવતા લલનાયુતાઃ ।
યત્ર ક્રીડન્તિ ચોદ્દેશે મુદા પરમયા યુતાઃ ॥ ૭૮.૫॥

અનુબન્ધાનિ રમ્યાણિ વિહગૈઃ કૂજિતાનિ ચ ।
રત્નોપકીર્ણતિર્થાનિ મહાપુણ્યજલાનિ ચ ॥ ૭૮.૬॥

અનેકજલયન્ત્રૈશ્ચ નાદિતાનિ મહાન્તિ ચ ।
શાખાભિર્લમ્બમાનાભી રુવત્પક્ષિકુલાલિભિઃ ॥ ૭૮.૭॥

કમલોત્પલકહ્લારશોભિતાનિ સરાંસિ ચ ।
ચતુર્ષુ તેષુ ગિરિષુ નાનાગુણયુતેષુ ચ ॥ ૭૮.૮॥

અરુણોદં તુ પૂર્વેણ દક્ષિણે માનસં સ્મૃતમ્ ।
અસિતોદં પશ્ચિમે ચ મહાભદ્રં તથોત્તરે ।
કુમુદૈઃ શ્વેતકપિલૈઃ કહ્લારૈર્ભૂષિતાનિ ચ ॥ ૭૮.૯॥

અરુણોદયસ્ય યે શૈલાઃ પ્રાચ્યા વૈ નામતઃ સ્મૃતાઃ ।
તાન્ કીર્ત્યમાનાંસ્તત્ત્વેન શૃણુધ્વં ગદતો મમ ॥ ૭૮.૧૦॥

વિકઙ્કો મણિશૃઙ્ગશ્ચ સુપાત્રશ્ચોપલો મહાન્ ।
મહાનીલોઽથ કુમ્ભશ્ચ સુબિન્દુર્મદનસ્તથા ॥ ૭૮.૧૧॥

વેણુનદ્ધઃ સુમેદાશ્ચ નિષધો દેવપર્વતઃ ।
ઇત્યેતે પર્વતવરાઃ પુણ્યાશ્ચ ગિરયોઽપરે ॥ ૭૮.૧૨॥

પૂર્વેણ મન્દરાત્ સિદ્ધાઃ પર્વતાશ્ચ મદાયુતાઃ ।
સરસો માનસસ્યેહ દક્ષિણેન મહાચલાઃ ॥ ૭૮.૧૩॥

યે કીર્ત્તિતા મયા તુભ્યં નામતસ્તાન્ નિબોધત ।
શૈલસ્ત્રિશિખરશ્ચૈવ શિશિરશ્ચાચલોત્તમઃ ॥ ૭૮.૧૪॥

કપિશ્ચ શતમક્ષશ્ચ તુરગશ્ચૈવ સાનુમાન્ ।
તામ્રાહશ્ચ વિષશ્ચૈવ તથા શ્વેતોદનો ગિરિઃ ॥ ૭૮.૧૫॥

સમૂલશ્ચૈવ સરલો રત્નકેતુશ્ચ પર્વતઃ ।
એકમૂલો મહાશૃઙ્ગો ગજમૂલોઽપિ શાવકઃ ॥ ૭૮.૧૬॥

પઞ્ચશૈલશ્ચ કૈલાસો હિમવાનચલોત્તમઃ ।
ઉત્તરા યે મહાશૈલાસ્તાન્ વક્ષ્યામિ નિબોધત ॥ ૭૮.૧૭॥

કપિલઃ પિઙ્ગલો ભદ્રઃ સરસશ્ચ મહાચલઃ ।
કુમુદો મધુમાંશ્ચૈવ ગર્જનો મર્કટસ્તથા ॥ ૭૮.૧૮॥

કૃષ્ણશ્ચ પાણ્ડવશ્ચૈવ સહસ્રશિરસસ્તથા ।
પારિયાત્રશ્ચ શૈલેન્દ્રઃ શૃઙ્ગવાનચલોત્તમઃ ।
ઇત્યેતે પર્વતવરાઃ શ્રીમન્તઃ પશ્ચિમે સ્મૃતાઃ ॥ ૭૮.૧૯॥

મહાભદ્રસ્ય સરસ ઉત્તરેણ દ્વિજોત્તમાઃ ।
યે પર્વતાઃ સ્થિતા વિપ્રાસ્તાન્ વક્ષ્યામિ નિબોધત ॥ ૭૮.૨૦॥

હંસકૂટો મહાશૈલો વૃષહંસશ્ચ પર્વતઃ ।
કપિઞ્જલશ્ચ શૈલેન્દ્ર ઇન્દ્રશૈલશ્ચ સાનુમાન્ ॥ ૭૮.૨૧॥

નીલઃ કનકશૃઙ્ગશ્ચ શતશૃઙ્ગશ્ચ પર્વતઃ ।
પુષ્કરો મેઘશૈલોઽથ વિરજાશ્ચાચલોત્તમઃ ।
જારુચિશ્ચૈવ શૈલેન્દ્ર ઇત્યેતે ઉત્તરાઃ સ્મૃતાઃ ॥ ૭૮.૨૨॥

ઇત્યેતેષાં તુ મુખ્યાનામુત્તરેષુ યથાક્રમમ્ ।
સ્થલીરન્તરદ્રોણ્યશ્ચ સરાંસિ ચ નિબોધત ॥ ૭૮.૨૩॥

॥ ઇતિ શ્રીવરાહપુરાણે ભગવચ્છાસ્ત્રે અષ્ટસપ્તતિતમોઽધ્યાયઃ ॥ ૭૮॥

## શ્રીવરાહપુરાણે એકોનાશીતિતમોઽધ્યાયઃ

રુદ્ર ઉવાચ ।
સીતાન્તસ્યાચલેન્દ્રસ્ય કુમુદસ્યાન્તરેણ ચ ।
દ્રોણ્યાં વિહઙ્ગપુષ્ટાયાં નાનાસત્ત્વનિષેવિતમ્ ॥ ૭૯.૧॥

ત્રિયોજનશતાયામં શતયોજનવિસ્તૃતમ્ ।
સુરસામલપાનીયં રમ્યં તત્ર સુરોચનમ્ ॥ ૭૯.૨॥

દ્રોણમાત્રપ્રમાણૈશ્ચ પુણ્ડરીકૈઃ સુગન્ધિભિઃ ।
સહસ્રશતપત્રૈશ્ચ મહાપદ્મૈરલઙ્કૃતમ્ ॥ ૭૯.૩॥

દેવદાનવગન્ધર્વૈર્મહાસર્પૈરધિષ્ઠિતમ્ ।
પુણ્યં તચ્છ્રીસરો નામ સપ્રકાશમિહેહ ચ ॥ ૭૯.૪॥

પ્રસન્નસલિલૈઃ પૂર્ણં શરણ્યં સર્વદેહિનામ્ ।
તત્ર ત્વેકં મહાપદ્મં મધ્યે પદ્મવનસ્ય ચ ॥ ૭૯.૫॥

કોટિપત્રપ્રકલિતં તરુણાદિત્યવર્ચસમ્ ।
નિત્યં વ્યાકોશમધુરં ચરત્વાદતિમણ્ડલમ્ ॥ ૭૯.૬॥

ચારુકેસરજાલાઢ્યં મત્તભ્રમરનાદિતમ્ ।
તસ્મિન્ મધ્યે ભગવતી સાક્ષાત્ શ્રીર્નિત્યમેવ હિ ।
લક્ષ્મીસ્તુ તં તદાવાસં મૂર્ત્તિમન્તં ન સંશયઃ ॥ ૭૯.૭॥

સરસસ્તસ્ય તીરે તુ તસ્મિન્ સિદ્ધનિષેવિતમ્ ।
સદા પુષ્પફલં રમ્યં તત્ર બિલ્વવનં મહત્ ॥ ૭૯.૮॥

શતયોજનવિસ્તીર્ણં દ્વિયોજનશતાયતમ્ ।
અર્દ્ધક્રોશોચ્ચશિખરૈર્મહાવૃક્ષૈઃ સમન્તતઃ ।
શાખાસહસ્રકલિતૈર્મહાસ્કન્ધૈઃ સમાકુલમ્ ॥ ૭૯.૯॥

ફલૈઃ સહસ્રસઙ્કાશૈઃ હરિતૈઃ પાણ્ડુરૈસ્તથા ।
અમૃતસ્વાદુસદૃશૈર્ભેરીમાત્રૈઃ સુગન્ધિભિઃ ॥ ૭૯.૧૦॥

શીર્યદ્ભિશ્ચ પતદ્ભિશ્ચ કીર્ણભૂમિવનાન્તરમ્ ।
નામ્ના તચ્છ્રીવનં નામ સર્વલોકેષુ વિશ્રુતમ્ ॥ ૭૯.૧૧॥

દેવાદિભિઃ સમાકીર્ણમષ્ટાભિઃ કકુભિઃ શુભમ્ ।
બિલ્વાશિભિશ્ચ મુનિભિઃ સેવિતં પુણ્યકારિભિઃ ।
તત્ર શ્રીઃ સંસ્થિતા નિત્યં સિદ્ધસઙ્ઘનિષેવિતા ॥ ૭૯.૧૨॥

એકૈકસ્યાચલેન્દ્રસ્ય મણિશૈલસ્ય ચાન્તરમ્ ।
શતયોજનવિસ્તીર્ણં દ્વિયોજનશતાયતમ્ ॥ ૭૯.૧૩॥

વિમલં પઙ્કજવનં સિદ્ધચારણસેવિતમ્ ।
પુષ્પં લક્ષ્મ્યા ધૃતં ભાતિ નિત્યં પ્રજ્વલતીવ હ ॥ ૭૯.૧૪॥

અર્દ્ધક્રોશં ચ શિખરૈર્મહાસ્કન્ધૈઃ સમાવૃતમ્ ।
પ્રફુલ્લશાખાશિખરં પિઞ્જરં ભાતિ તદ્વનમ્ ॥ ૭૯.૧૫॥

દ્વિબાહુપરિણાહૈસ્તૈસ્ત્રિહસ્તાયામવિસ્તૃતૈઃ ।
મનઃશિલાચૂર્ણનિભૈઃ પાણ્ડુકેસરશાલિભિઃ ॥ ૭૯.૧૬॥

પુષ્પૈર્મનોહરૈર્વ્યાપ્તં વ્યાકોશૈર્ગન્ધશોભિભિઃ ।
વિરાજતિ વનં સર્વં મત્તભ્રમરનાદિતમ્ ॥ ૭૯.૧૭॥

તદ્વનં દાનવૈર્દૈત્યૈર્ગન્ધર્વૈર્યક્ષરાક્ષસૈઃ ।
કિન્નરૈરપ્સરોભિશ્ચ મહાભોગૈશ્ચ સેવિતમ્ ॥ ૭૯.૧૮॥

તત્રાશ્રમો ભગવતઃ કશ્યપસ્ય પ્રજાપતેઃ ।
સિદ્ધસાધુગણાકીર્ણં નાનાઽઽશ્રમસમાકુલમ્ ॥ ૭૯.૧૯॥

મહાનીલસ્ય મધ્યે તુ કુમ્ભસ્ય ચ ગિરેસ્તથા ।
મધ્યે સુખા નદી નામ તસ્યાસ્તીરે મહદ્વનમ્ ॥ ૭૯.૨૦॥

પઞ્ચાશદ્યોજનાયામં ત્રિંશદ્યોજનમણ્ડલમ્ ।
રમ્યં તાલવનં શ્રીમત્ ક્રોશાર્દ્ધોચ્છ્રિતપાદપમ્ ॥ ૭૯.૨૧॥

મહાબલૈર્મહાસારૈઃ સ્થિરૈરવિચલૈઃ શુભૈઃ ।
મહદઞ્જનસંસ્થાનૈઃ પરિવૃત્તૈર્મહાફલૈઃ ॥ ૭૯.૨૨॥

મૃષ્ટગન્ધગુણોપેતૈરુપેતં સિદ્ધસેવિતમ્ ।
ઐરાવતસ્ય કરિણસ્તત્રૈવ સમુદાહૃતમ્ ॥ ૭૯.૨૩॥

ઐરાવતસ્ય રુદ્રસ્ય દેવશૈલસ્ય ચાન્તરે ।

સહસ્રયોજનાયામા શતયોજનવિસ્તૃતા ॥ ૭૯.૨૪॥

સર્વા હ્યેકશિલા ભૂમિર્વૃક્ષવીરુધવર્જિતા ।
આપ્લુતા પાદમાત્રેણ સલિલેન સમન્તતઃ ॥ ૭૯.૨૫॥

ઇત્યેતાભ્યન્તરદ્રોણ્યો નાનાકારાઃ પ્રકીર્ત્તિતાઃ ।
મેરોઃ પાર્શ્વેન વિપ્રેન્દ્રા યથાવદનુપૂર્વશઃ ॥ ૭૯.૨૬॥

॥ ઇતિ શ્રીવરાહપુરાણે ભગવચ્છાસ્ત્રે એકોનાશીતિતમોઽધ્યાયઃ ॥ ૭૯॥

## શ્રીવરાહપુરાણે અશીતિતમોઽધ્યાયઃ

રુદ્ર ઉવાચ ।
અથ દક્ષિણદિગ્વ્યવસ્થિતાઃ પર્વતદ્રોણ્યઃ સિદ્ધાચરિતાઃ
કીર્ત્યન્તે । શિશિરપતઙ્ગયોર્મધ્યે શુક્લભૂમિસ્ત્રિયા
મુક્તલતાગલિતપાદપમ્ ।
ઇક્ષુક્ષેપે ચ શિખરે પાદપૈરુપશોભિતમ્ ।
ઉદુમ્બરવનં રમ્યં પક્ષિસઙ્ઘનિષેવિતમ્ ॥ ૮૦.૧॥

ફલિતં તદ્વનં ભાતિ મહાકૂર્મોપમૈઃ ફલૈઃ ॥

તદ્વનં દેવયોન્યોઽષ્ટૌ સેવન્તે સર્વદૈવ હિ ॥ ૮૦.૨॥

વરાહપુરાણ ॥ ૮૦.૩॥

તત્ર પ્રસન્નસ્વાદુસલિલા બહૂદકા નદ્યો વહન્તિ ।
તત્રાશ્રમો ભગવતઃ કર્દમસ્ય પ્રજાપતેઃ ।
નાનામુનિજનાકીર્ણસ્તચ્ચ શતયોજનમેકં પરિમણ્ડલં
વનં ચ । તથા ચ તામ્રાભસ્ય શૈલસ્ય પતઙ્ગસ્ય ચાન્તરે
શતયોજનવિસ્તીર્ણં દ્વિગુણાયતં બાલાર્કસદૃશ-
રાજીવપુણ્ડરીકૈઃ સમન્તતઃ સહસ્રપત્રૈરવિરલૈરલઙ્કૃતં
મહત્ સરોઽનેકસિદ્ધગન્ધર્વાધ્યુષિતમ્ । તસ્ય ચ મધ્યે
મહાશિખરઃ શતયોજનાયામસ્ત્રિંશદ્યોજનવિસ્તીર્ણો-
ઽનેકધાતુરત્નભૂષિતસ્તસ્ય ચોપરિ મહતી રથ્યા
રત્નપ્રાકારતોરણા । તસ્યાં મહદ્વિદ્યાધરપુરમ્ ।
તત્ર પુલોમનામા વિદ્યાધરરાજઃ શતસહસ્રપરીવારઃ ।
તથા ચ વિશાખાચલેન્દ્રસ્ય શ્વેતસ્ય ચાન્તરે સરઃ ।

તસ્ય ચ પૂર્વતીરે મહદામ્રવનં કનકસઙ્કાશૈઃ ફલૈ-
રતિસુગન્ધિભિર્મહાકુમ્ભમાત્રૈઃ સર્વતશ્ચિતમ્ ।
દેવગન્ધર્વાદયશ્ચ તત્ર નિવસન્તિ ।
સમુલસ્યાચલેન્દ્રસ્ય વસુધારસ્ય ચાન્તરે ।
ત્રિંશદ્યોજનવિસ્તીર્ણે પઞ્ચાશદ્યોજનાયતે ॥

બિલ્વસ્થલી નામ તત્ર ફલાનિ વિદ્રુમસઙ્કાશાનિ
તૈશ્ચ પતદ્ભિઃ સ્થલમૃત્તિકા ક્લિન્ના । તાં ચ સ્થલીં
સુગુહ્યકાદયઃ સેવન્તે બિલ્વફલાશિનઃ । તથા ચ
વસુધારરત્નધારયોરન્તરે વિં-ત્રિંશદ્યોજનવિસ્તીર્ણં
શતયોજનમાયતં સુગન્ધિકિંશુકવનં સદા કુસુમચયસ્ય
ગન્ધેન વાસ્યતે યોજનશતમ્ । તત્ર સિદ્ધાધ્યુષિતં
જલોપેતં ચ । તત્ર ચાદિત્યસ્ય દેવસ્ય મહદાયતનમ્ ।
સ માસે માસે ભગવાનવતરતિ સૂર્યઃ । પ્રજાપતિં
લોકૈકજનકં દેવાદયો નમસ્યન્તિ । તથા ચ પઞ્ચકૂટસ્ય
કૈલાસસ્ય ચાન્તરે સહસ્રયોજનાયામં વિસ્તીર્ણં શતયોજનં હંસપાણ્ડુરં
ક્ષુદ્રસત્ત્વૈરનાધૃષ્યં સ્વર્ગસોપાનમિવ ભૂમણ્ડલમ્ ।
અથ પશ્ચિમદિગ્ભાગે વ્યવસ્થિતા ગિરિદ્રોણ્યઃ કીર્ત્યન્તે ।
સુપાર્શ્વશિખિશૈલયોર્મધ્યે સમન્તાદ્યોજનશતમેકં
ભૌમશિલાતલં નિત્યતપ્તં દુઃસ્પર્શમ્ । તસ્ય મધ્યે
ત્રિંશદ્યોજનવિસ્તીર્ણં મણ્ડલં વહ્નિસ્થાનમ્ । સ ચ
સર્વકાલમનિન્ધનો ભગવાન્ લોકક્ષયકારી સંવર્તકો
જ્વલતે । અન્તરે ચ શૈલવરયોઃ કુમુદાઞ્જનયોઃ
શતયોજનવિસ્તીર્ણા માતુલુઙ્ગસ્થલી સર્વસત્ત્વાના-
મગમ્યા । પીતવર્ણૈઃ ફલૈરાવૃતા સતી સા સ્થલી
શોભતે । તત્ર ચ પુણ્યો હ્રદઃ સિદ્ધૈરુપેતઃ । બૃહસ્પતે-
સ્તદ્વનમ્ । તથા ચ શૈલયોઃ પિઞ્જરગૌરયોરન્તરેણ
સરોદ્રોણી હ્યનેકશતયોજનાયતા મહદ્ભિશ્ચ ષટ્પદોદ્ઘુષ્ટૈઃ
કુમુદૈરુપશોભિતા । તત્ર ચ ભગવતો વિષ્ણોઃ પરમેશ્વર-
સ્યાયતનમ્ । તથા ચ શુક્લપાણ્ડુરયોરપિ મહાગિર્યોરન્તરે
ત્રિંશદ્યોજનવિસ્તીર્ણો નવત્યાયત એકઃ શિલોદ્દેશો વૃક્ષવિવર્જિતઃ ।
તત્ર નિષ્પઙ્કા દીર્ઘિકા સવૃક્ષા ચ સ્થલપદ્મિની અનેકજાતીયૈશ્ચ

પદ્મૈઃ શોભિતા । તસ્યાશ્ચ મધ્યે પઞ્ચયોજનપ્રમાણો મહાન્યગ્રોધ-
વૃક્ષઃ । તસ્મિંશ્ચન્દ્રશેખરોમાપતિર્નીલવાસાશ્ચ દેવો નિવસતિ
યક્ષાદિભિરીડ્યમાનઃ । સહસ્રશિખરસ્ય ગિરેઃ કુમુદસ્ય ચાન્તરે
પઞ્ચાશદ્યોજનાયામં વિંશદ્યોજનવિસ્તૃતમિક્ષુક્ષેપોચ્ચશિખરમનેક-
પક્ષિસેવિતમ્ । અનેકવૃક્ષફલૈર્મધુરસ્રવૈરુપશોભિતમ્ । તત્ર
ચેન્દ્રસ્ય મહાનાશ્રમો દિવ્યાભિપ્રાયનિર્મિતઃ । તથા ચ
શઙ્ખકૂટઋષભયોર્મધ્યે પુરુષસ્થલી રમ્યાઽનેકગુણાનેક-
યોજનાયતા બિલ્વપ્રમાણૈઃ કઙ્કોલકૈઃ સુગન્ધિભિરુપેતા ।
તત્ર પુરુષરસોન્મત્તાઃ નાગાદ્યાઃ પ્રતિવસન્તિ ।
તથા કપિઞ્જલનાગશૈલયોરન્તરે દ્વિશતયોજનમાયામવિસ્તીર્ણા
શતયોજનસ્થલી નાનાવનવિભૂષિતા દ્રાક્ષાખર્જૂરખણ્ડૈરુપેતા
અનેકવૃક્ષવલ્લીભિરનેકૈશ્ચ
સરોભિરુપેતા સા સ્થલી । તથા ચ પુષ્કરમહામેઘયોરન્તરે
ષષ્ટિયોજનવિસ્તીર્ણા શતાયામા પાણિતલપ્રખ્યા મહતી સ્થલી
વૃક્ષવીરુધવિવર્જિતા । તસ્યાશ્ચ પાર્શ્વે ચત્વારિ મહાવનાનિ સરાંસિ
ચાનેકયોજનાનામ્ ।દશ પઞ્ચ સપ્ત તથાષ્ટૌ ત્રિંશદ્વિંશતિ યોજનાનાં
સ્થલ્યો દ્રોણ્યશ્ચ । તત્ર કાશ્ચિન્મહાઘોરાઃ પર્વતકુક્ષયઃ ।

॥ ઇતિ શ્રીવરાહપુરાણે ભગવચ્છાસ્ત્રે અશીતિતમોઽધ્યાયઃ ॥ ૮૦॥

## શ્રીવરાહપુરાણે એકાશીતિતમોઽધ્યાયઃ

રુદ્ર ઉવાચ ।
અતઃ પરં પર્વતેષુ દેવાનામવકાશા વર્ણ્યન્તે । તત્ર યોઽસૌ
શાન્તાખ્યઃ પર્વતસ્તસ્યોપરિ મહેન્દ્રસ્ય ક્રીડાસ્થાનમ્ ।
તત્ર દેવરાજસ્ય પારિજાતકવૃક્ષવનમ્ । તસ્ય પૂર્વપાર્શ્વે કુઞ્જરો
નામ ગિરિઃ । તસ્યોપરિ દાનવાનામષ્ટૌ પુરાણિ ચ ।
તથા વજ્રકે પર્વતવરે રાક્ષસાનામનેકાનિ પુરાણિ ।
તે ચ નામ્ના નીલકાઃ કામરૂપિણઃ । મહાનીલેઽપિ શૈલેન્દ્રપુરાણિ ।
પઞ્ચદશસહસ્રાણિ કિન્નરાણાં ખ્યાતાનિ ।
તત્ર દેવદત્તચન્દ્રાદયો રાજાનઃ । પઞ્ચદશકિન્નરાણાં ગર્વિતાઃ ।
તાનિ સૌવર્ણાનિ બિલપ્રવેશનાનિ ચ પુરાણિ ।
ચન્દ્રોદયે ચ પર્વતવરે નાગાનામધિવાસઃ ।

તે ચ બિલપ્રવેશાઃ બિલેષુ વૈનતેયવિષયાવર્ત્તિનો
વ્યવસ્થિતાનુરાગે ચ દાનવેન્દ્રા વ્યવસ્થિતાઃ ।
વેણુમત્યપિ વિદ્યાધરપુરત્રયમ્ । ત્રિંશદ્યોજનશત-
વિસ્તીર્ણમેકૈકં તાવદાયતમ્ । ઉલૂકરોમશમહાવેત્રાદયશ્ચ
રાજાનો વિદ્યાધરાણામ્ । એકૈકે ચ શૈલરાજનિ સ્વયમેવ
ગરુડો વ્યવસ્થિતઃ । કુઞ્જરે તુ પર્વતવરે નિત્યં પશુપતિઃ
સ્થિતઃ । વૃષભાઙ્કો મહાદેવઃ શઙ્કરો યોગિનાં વરઃ
અનેકગણભૂતકોટિસહસ્રવારો ભગવાન્ અનાદિપુરુષો
વ્યવસ્થિતઃ । વસુધારે ચ પુષ્પવતાં વસૂનાં ચસમાવાસઃ ।
વસુધારરત્નધારયોર્મૂર્ધ્નિ અષ્ટૌ સપ્ત ચ સઙ્ખ્યયા ।
પુરાણિ વસુસપ્તર્ષીણાં ચેતિ । એકશ◌ૃઙ્ગે ચ પર્વતોત્તમે
પ્રજાપતેઃ સ્થાનં ચતુર્વક્ત્રસ્ય બ્રહ્મણઃ । ગજપર્વતે ચ
મહાભૂતપરિવૃતા સ્વયમેવ ભગવતી તિષ્ઠતિ । વસુધારે ચ
પર્વતવરે મુનિસિદ્ધવિદ્યાધરાણામાયતનં ચતુરાશીત્યપરપુર્યો
મહાપ્રાકારતોરણાઃ । તત્ર ચાનેકપર્વતા નામ ગન્ધર્વા
યુદ્ધશાલિનો વસન્તિ । તેષાં ચાધિપતિર્દેવો રાજરાજૈકપિઙ્ગલઃ ।
સુરરાક્ષસાઃ પઞ્ચકૂટે દાનવાઃ શતશ◌ૃઙ્ગે યક્ષાણાં પુરઃશતમ્ ।
તામ્રાભે તક્ષકસ્ય પુરઃશતમ્ । વિશખપર્વતે ગુહસ્યાયતનમ્ ।
શ્વેતોદયે ગિરિવરે મહાગન્ધર્વભવનમ્ । હરિકૂટે હરિર્દેવઃ ।
કુમુદે કિન્નરાવાસઃ । અઞ્જને મહોરગાઃ । સહસ્રશિખરે ચ
દૈત્યાનામુગ્રકર્મિણામાવાસઃ । પુરાણાં સહસ્રમેકં
હેમમાલિનાં મુકુટે પન્નપ્રપક્ષે પર્વતવરે ચત્વાર્યાયતનાનિ તુ ।
એવં મેરુપર્વતેષુ દેવાનામધિવાસઃ । મર્યાદાપર્વતે દેવકૂટે
પુરવિન્યાસઃ કીર્ત્યતે । તસ્યોપરિ યોજનશતં ગરુડસ્ય
જાતં ક્ષેત્રમ્ । તસ્યૈવ પાર્શ્વતસ્ત્રિંશદ્યોજનવિસ્તીર્ણા-
શ્ચત્વારિંશદાયતાઃ સપ્તગન્ધર્વનગરાઃ । આગ્નેયાશ્ચ નામ્ના
ગન્ધર્વાતિબલિનઃ । તત્ર ચાન્યત્ ત્રિંશદ્યોજનમણ્ડલં પુરં
સૈંહિકેયાનામ્ । તત્ર ચ દેવર્ષિચરિતાનિ દેવકૂટે દૃશ્યન્તે ।
પુરં ચ કાલકેયાનાં તત્રૈવ । તથા ચાન્તરતટેઽન્યેસુનાન્નામ
તસ્યૈવ દક્ષિણે ત્રિંશદ્યોજનવિસ્તૃતં દ્વિષષ્ટિયોજનાયામં પુરં
કામરૂપિણાં દૃપ્તાનાં મધ્યમે ચ તસ્ય હેમકૂટે મહાદેવસ્ય
ન્યગ્રોધઃ । અથાતઃ કૈલાસવર્ણકો ભવતિ । કૈલાસસ્ય તટે

યોજનશતમાયામવસ્તૃતં ભુવનમાલાભિવ્યાપ્તમ્ ।
તસ્યાશ્ચ મધ્યે સભા । તત્ર ચ તત્પુષ્કરં નામ વિમાનં તિષ્ઠતિ ।
ધનદસ્ય ચ તદ્વિમાનમધિવાસશ્ચ । તત્ર પદ્મમહાપદ્મમકરકચ્છપ-
કુમુદશઙ્ખનીલનન્દમહાનિધયઃ પ્રતિવસન્તિ । તત્ર ચન્દ્રાદીનાં
લોકપાલાનામાવાસઃ । તત્ર ચ મન્દાકિની નામ નદી ।
તથા કનકમન્દા મન્દા ચેતિ
નામભિઃ સરિતઃ । તત્રાન્યા અપિ નદ્યઃ સન્તિ । પૂર્વપાર્શ્વે ચ
શતયોજનમાયામાસ્ત્રિંશદ્યોજનવિસ્તૃતા દશગન્ધર્વપુર્યઃ તાસુ ચ
સકુબાહુહરિકેશચિત્રસેનાદયો રાજાનઃ । તસ્યૈવ ચ પશ્ચિમકૂટે
અશીતિયોજનાયામં ચત્વારિંશદ્વિસ્તૃતમેકૈકં યક્ષનગરમ્ । તેષુ
ચ મહામાલિસુનેત્ર ચક્રાદયો નાયકાઃ । તસ્યૈવ દક્ષિણે પાર્શ્વે
કુઞ્જદરીષુ ગુહાસુ સમુદ્રાઃ સમુદ્રં યાવત્કિન્નરાણાં પુરશતમ્ । તેષુ
ચ દ્રુમસુગ્રીવાદિભગદત્તપ્રમુખં રાજશતમ્ । તત્ર ચ રુદ્રસ્યોમયા
સાર્દ્ધં વિવાહસ્સંવૃત્તઃ । તપશ્ચ કૃતવતી ગૌરી । કિરાતરૂપિણા
ચ રુદ્રેણ સ્થિતમ્ । તત્રૈવ તત્ર સ્થિતેન સોમેન શઙ્કરેણ
જમ્બૂદ્વીપાવલોકનં કૃતમ્ । તત્ર ચાનેકકિન્નરગન્ધર્વોપગીતમુમાવનં
નામાપ્સરોભિરનેકપુષ્પલતાવલ્લીભિરુપેતમ્ । યત્ર ભગવતા
મહેશ્વરેણાર્દ્ધનારીનરવપુઃ પ્રાપ્તમ્ । તત્ર ચ કાર્તિકેયસ્ય
શરદ્વનમ્ । પુષ્પચિત્રક્રૌઞ્ચયોર્મધ્યે કાર્તિકેયાભિષેકઃ કૃતઃ
તસ્ય ચ પૂર્વતટે સિદ્ધમુનિગણાવાસઃ કલાપગ્રામો નામ । તથા ચ
માર્કણ્ડેયવસિષ્ઠપરાશરનલવિશ્વામિત્રોદ્દાલકાદીનાં મહર્ષીણામનેકાનિ
સહસ્રાણ્યાશ્રમાણાં હિ ભવતિ । તથા ચ પશ્ચિમસ્યાચલેન્દ્રસ્ય
નિષધસ્ય ભાગં શ઼ૃણુત । તસ્ય ચ મધ્યમકૂટે વિષ્ણ્વાયતનં
મહાદેવસ્ય । તસ્યૈવોત્તરતટે ત્રિંશદ્યોજનવિસ્તૃતં મહત્પુરં
લમ્બાખ્યાતં રાક્ષસાનામ્ । તસ્યૈવ દક્ષિણે પાર્શ્વે બિલપ્રવેશનગરમ્ ।
પ્રભેદકસ્ય પશ્ચિમેન દેવદાનવસિદ્ધાદીનાં પુરાણિ । તસ્ય
ગિરેર્મૂર્ધ્નિ મહતી સોમશિલા તિષ્ઠતિ । તસ્યાં ચ પર્વણિ સોમઃ
સ્વયમેવાવતરતિ । તસ્યૈવોત્તરપાર્શ્વે ત્રિકૂટં નામ । તત્ર બ્રહ્મા
તિષ્ઠતિ ક્વચિત્ । તથા ચ વહ્ન્યાયતનમ્ । મૂર્ત્તિમાન્ વહ્નિરુપાસ્યતે
દેવૈઃ । ઉત્તરે ચ શ઼ૃઙ્ગાખ્યે પર્વતવરે દેવતાનામાયતનાનિ ।
પૂર્વે નારાયણસ્યાયતનમ્ । મધ્યે બ્રહ્મણઃ । શઙ્કરસ્ય પશ્ચિમે
તત્ર ચ યક્ષાદીનાં કેચિત્ પુરાણિ તસ્ય ચોત્તરતીરે જાતુછે મહાપર્વતે

ત્રિંશદ્યોજનમણ્ડલં નન્દજલં નામ સરસ્તત્ર નન્દો નામ નાગરાજા
વસતિ । શતશીર્ષપ્રચણ્ડ ઇતિ ઇત્યેતેઽષ્ટૌ દેવપર્વતા વિજ્ઞેયાઃ ।
તે ચાનુક્રમેણ હેમરજતરત્નવૈદૂર્યમાનઃ શિલાહિઙ્ગુલાદિવર્ણાઃ ।
ઇયં ચ પૃથ્વી લક્ષકોટિશતાનેકસઙ્ખ્યાતાનાં પૂર્ણા તેષુ ચ
સિદ્ધવિદ્યાધરાણાં નિલયાઃ તે ચ મેરોઃ પાર્શ્વતઃ કેસરવલયાલવાલં
સિદ્ધલોકેતિ કીર્ત્યતે । ઇયં પૃથ્વી પદ્માકારેણ વ્યવસ્થિતા । એષ
ચ સર્વપુરાણેષુ ક્રમઃ સામાન્યતઃ પ્રતિપાદ્યતે ।

॥ ઇતિ શ્રીવરાહપુરાણે ભગવચ્છાસ્ત્રે એકાશીતિતમોઽધ્યાયઃ ॥ ૮૧॥

## શ્રીવરાહપુરાણે દ્વ્યશીતિતમોઽધ્યાયઃ

રુદ્ર ઉવાચ ।
અથ નદીનામવતારં શ ृણુત । આકાશસમુદ્રો યઃ કીર્ત્યતે સામાખ્ય-
સ્તસ્માદાકાશગામિની નદી પ્રવૃત્તા । સા ચાનવરતમિન્દ્રગજેન
ક્ષોભ્યતે । સા ચ ચતુરશીતિસહસ્રોચ્છ્રાયા । સા મેરોઃ સુદર્શનં
કરોતિ । સા ચ મેરુકૂટતટાન્તેભ્યઃ પ્રસ્ખલિતા ચતુર્ધા સઞ્જાતા ।
ષષ્ટિં ચ યોજનસહસ્રં નિરાલમ્બા પતમાના પ્રદક્ષિણમનુસરન્તી
ચતુર્દ્ધા જગામ । સીતા ચાલકનન્દા ચક્ષુર્ભદ્રા ચેતિ નામભિઃ ।
યથોદ્દેશં સા ચાનેકશતસહસ્રપર્વતાનાં દારયન્તી ગાં ગતેતિ
ગઙ્ગેત્યુચ્યતે અથ ગન્ધમાદનપાર્શ્વેઽમરગણ્ડિકા વર્ણ્યતે ।
એકત્રિંશદ્યોજનસહસ્રાણિ આયામઃ ચતુઃશતવિસ્તીર્ણમ્ ।
તત્ર કેતુમાલાઃ સર્વે જનપદાઃ । કૃષ્ણવર્ણાઃ પુરુષા મહાબલિનઃ ।
ઉત્પલવર્ણાઃ સ્ત્રિયઃ શુભદર્શનાઃ । તત્ર ચ મહાવૃક્ષાઃ પનસાઃ સન્તિ ।
તત્રેશ્વરો બ્રહ્મપુત્રસ્તિષ્ઠતિ । તત્રોદપાનાચ્ચ જરારોગવિવર્જિતા
વર્ષાયુતાયુષશ્ચ નરાઃ । માલ્યવતઃ પૂર્વપાર્શ્વે પૂર્વગણ્ડિકા
એકશ ृઙ્ગાદ્યોજનસહસ્રાણિ માનતસ્તત્ર ચ ભદ્રાશ્વા નામ જનપદાઃ
ભદ્રસાલવનં ચ તત્ર વ્યવસ્થિતમ્ । કાલામ્રવૃક્ષાઃ પુરુષાઃ શ્વેતાઃ
પદ્મવર્ણિનઃ સ્ત્રિયઃ કુમુદવર્ણા દશવર્ષસહસ્રાણિ તેષામાયુઃ ।
તત્ર ચ પઞ્ચ કુલપર્વતાઃ । તદ્યથા શૈલવર્ણઃ માલાખ્યઃ
કોરજશ્ચ ત્રિપર્ણઃ નીલશ્ચેતિ તદ્વિનિર્ગતાઃ । તદમ્ભઃસ્થિતાનાં
દેશાનાં તાન્યેવ નામાનિ । તે ચ દેશા એતા નદીઃ પિબન્તિ ।
તદ્યથા સીતા સુવાહિની હંસવતી કાસા મહાચક્રા ચન્દ્રવતી

કાવેરી સુરસા શાખાવતી ઇન્દ્રવતી અઙ્ગારવાહિની હરિતોયા
સોમાવર્તા શતહ્રદા વનમાલા વસુમતી હંસા સુપર્ણા પઞ્ચગઙ્ગા
ધનુષ્મતી મણિવપ્રા સુબ્રહ્મભાગા વિલાસિની કૃષ્ણતોયા પુણ્યોદા
નાગવતી શિવા શેવાલિની મણિતટા ક્ષીરોદા વરુણાવતી વિષ્ણુપદી
મહાનદી હિરણ્યસ્કન્ધવાહા સુરાવતી કામોદા પતાકાશ્ચેત્યેતા
મહાનદ્યઃ । એતાશ્ચ ગઙ્ગાસમાઃ કીર્તિતાઃ । આજન્માન્તં પાપં
વિનાશયન્તિ । ક્ષુદ્રનદ્યશ્ચ કોટિશઃ । તાશ્ચ નદીર્યે પિબન્તિ તે
દશવર્ષસહસ્રાયુષઃ । રુદ્રોમાભક્તા ઇતિ ।

॥ ઇતિ શ્રીવરાહપુરાણે ભગવચ્છાસ્ત્રે દ્વ્યશીતિતમોऽધ્યાયઃ ॥ ૮૨॥

## શ્રીવરાહપુરાણે ત્ર્યશીતિતમોऽધ્યાયઃ

રુદ્ર ઉવાચ ।
નિસર્ગ એષ ભદ્રાશ્વાનાં કીર્તિતઃ કેતુમાલાનાં વિસ્તરેણ કથિતમ્ ।
નૈષધસ્યાચલેન્દ્રસ્ય પશ્ચિમેન કુલાચલજનપદનદ્યઃ કીર્ત્યન્તે ।
તથા ચ વિશાખકમ્બલજયન્તકૃષ્ણહરિતાશોકવર્દ્ધમાના ઇત્યેતેષાં
સપ્તકુલપર્વતાનાં કોટિશઃ પ્રસૂતિઃ । તન્નિવાસિનો જનપદાસ્તન્નામાન
એવ દ્રષ્ટવ્યાઃ । તદ્યથા સૌરગ્રામાન્તઋઃ સાતપો કૃતસુરાશ્રવણકમ્બલ-
માહેયાચલકૂટવાસમૂલતપક્રૌઞ્ચકૃષ્ણાઙ્ગમણિપઙ્કજચૂડમલસોમીય-
સમુદ્રાન્તકકુરકુઞ્ચસુવર્ણતટકકુહશ્વેતાઙ્ગ-
કૃષ્ણપાદવિદકપિલકર્ણિક-
મહિષકુબ્જકરનાટમહોત્કટશુકનાકસજભૂમકકુરઞ્જન
મહાનાહકિઙ્કિસપર્ણભૌમકચોરકધૂમજન્માઙ્ગારજતીવનજીવ-
લૌકિતા વાચાં સહાઙ્ગમધુરેયશુકેયચકેયશ્રવણમત્ત
કાશિકગોદાવામકુલપઞ્જાબવર્જહમોદશાલક એતે જનપદા-
સ્તત્પર્વતોત્થા નદીઃ પિબન્તિ । તદ્યથા પ્લક્ષા મહાકદમ્બા માનસી
શ્યામા સુમેધા બહુલા વિવર્ણા પુઙ્ખા માલા દર્ભવતી ભદ્રાનદી શુકનદી
પલ્લવા ભીમા પ્રભઞ્જના કામ્બા કુશાવતી દક્ષા કાસવતી તુઙ્ગા પુણ્યોદા
ચન્દ્રાવતી સુમૂલાવતી કકુદ્મિની વિશાલા કરણ્ટકા પીવરી મહામાયા
મહિષી માનુષી ચણ્ડા એતા નદીઃ પ્રધાનાઃ ।
શેષાઃ ક્ષુદ્રનદ્યઃ સહસ્રશશ્ચેતિ ।

॥ ઇતિ શ્રીવરાહપુરાણે ભગવચ્છાસ્ત્રે ત્ર્યશીતિતમોऽધ્યાયઃ ॥ ૮૩॥

## શ્રીવરાહપુરાણે ચતુરશીતિતમોऽધ્યાયઃ

રુદ્ર ઉવાચ ।
ઉત્તરાણાં ચ વર્ષાણાં દક્ષિણાનાં ચ સર્વશઃ ।
આચક્ષતે યથાન્યાયં યે ચ પર્વતવાસિનઃ ।
તચ્છૃણુધ્વં મયા વિપ્રાઃ કીર્ત્યમાનં સમાહિતાઃ ॥ ૮૪.૧॥

દક્ષિણેન તુ શ્વેતસ્ય નીલસ્ય ચોત્તરેણ ચ ।
વાયવ્યાં રમ્યકં નામ જાયન્તે તત્ર માનવાઃ ।
મતિપ્રધાના વિમલા જરાદૌર્ગન્ધ્યવર્જિતાઃ ॥ ૮૪.૨॥

તત્રાપિ સુમહાન્ વૃક્ષો ન્યગ્રોધો રોહિતઃ સ્મૃતઃ ।
તત્ફલાદ્રસપાનાદ્ધિ દશવર્ષસહસ્રિણઃ ।
આયુષા સર્વમનુજા જાયન્તે દેવરૂપિણઃ ॥ ૮૪.૩॥

ઉત્તરેણ ચ શ્વેતસ્ય ત્રિશૃઙ્ગસ્ય ચ દક્ષિણે ।
વર્ષં હિરણ્મયં નામ તત્ર હૈરણ્વતી નદી ।
યક્ષા વસન્તિ તત્રૈવ બલિનઃ કામરૂપિણઃ ॥ ૮૪.૪॥

એકાદશસહસ્રાણિ સમાનાં તેન જીવતે ।
શતાન્યન્યાનિ જીવન્તે વર્ષાણાં દશ પઞ્ચ ચ ॥ ૮૪.૫॥

લકુચાઃ ક્ષુદ્રસા વૃક્ષાસ્તસ્મિન્ દેશે વ્યવસ્થિતાઃ ।
તત્ફલપ્રાશમાના હિ તેન જીવન્તિ માનવાઃ ॥ ૮૪.૬॥

તથા ત્રિશૃઙ્ગે ચ મણિકાઞ્ચનસર્વરત્નશિખરાનુક્રમેણ
તસ્ય ચોત્તરશૃઙ્ગાદ્દક્ષિણસમુદ્રાન્તે ચોત્તરકુરવઃ ।
વસ્ત્રાણ્યાભરણાનિ ચ વૃક્ષેષ્વેવ જાયન્તે ક્ષીરવૃક્ષાઃ
ક્ષીરાસવાઃ સન્તિ । મણિભૂમિઃ સુવર્ણબાલુકા । તસ્મિન્
સ્વર્ગચ્યુતાશ્ચ પુરુષા વસન્તિ ત્રયોદશવર્ષસહસ્રાયુષઃ ।
તસ્યૈવ દ્વીપસ્ય પશ્ચિમેન ચતુર્યોજનસહસ્રમતિક્રમ્ય
દેવલોકાચ્ચન્દ્રદ્વીપો ભવતિ યોજનસહસ્રપરિમણ્ડલઃ ।
તસ્ય મધ્યે ચન્દ્રકાન્તસૂર્યકાન્તનામાનૌ ગિરિવરૌ ।
તયોશ્ચ મધ્યે ચન્દ્રાવતી નામ મહાનદી અનેકવૃક્ષફલાનેક-

નદીસમાકુલા । એતત્કુરુવર્ષં ચ ।
તસ્યોત્તરપાર્શ્વે સમુદ્રોર્મિમાલાઢ્યં પઞ્ચયોજનસહસ્રમતિક્રમ્ય
દેવલોકાત્ સૂર્યદ્વીપો ભવતિ યોજનસહસ્રપરિમણ્ડલઃ ।
તસ્ય મધ્યે ગિરિવરઃ શતયોજનવિસ્તીર્ણસ્તાવદુચ્છ્રિતઃ ।
તસ્માત્સૂર્યાવર્ત્તનામા નદી નિર્ગતા । તત્ર ચ સૂર્યસ્યાધિષ્ઠિતં
તત્ર સૂર્યદૈવત્યાસ્તદ્વર્ણાશ્ચ પ્રજા દશવર્ષસહસ્રાયુષઃ ।
તસ્ય ચ દ્વીપસ્ય પશ્ચિમેન ચતુર્યોજનસહસ્રમતિક્રમ્ય સમુદ્રં
દશયોજનસહસ્રં પરિમણ્ડલત્વેન દ્વીપો રુદ્રાકરો નામ ।
તત્ર ચ ભદ્રાસનં વાયોરનેકરત્નશોભિતમ્ ।
તત્ર વિગ્રહવાન્ વાયુસ્તિષ્ઠતિ ।
તપનીયવર્ણાશ્ચ પ્રજાઃ પઞ્ચવર્ષસહસ્રાયુષઃ ॥ ૮૪.૭ ॥

॥ ઇતિ શ્રીવરાહપુરાણે ભગવચ્છાસ્ત્રે ચતુરશીતિતમોઽધ્યાયઃ ॥ ૮૪ ॥

## શ્રીવરાહપુરાણે પઞ્ચાશીતિતમોઽધ્યાયઃ

રુદ્ર ઉવાચ ।
ઇયં ભૂપદ્મવ્યવસ્થા કથિતા । ઇદાનીં ભારતં નવભેદં શૃણુત ।
તદ્યથા । ઇન્દ્રઃ કસેરુઃ તામ્રવર્ણો ગભસ્તિઃ નાગદ્વીપઃ સૌમ્યઃ
ગન્ધર્વઃ વારુણઃ ભારતં ચેતિ । સાગરસંવૃતમેકૈકં
યોજનસહસ્રપ્રમાણમ્ । તત્ર ચ સપ્ત કુલપર્વતા ભવન્તિ । તદ્યથા ।
મહેન્દ્રો મલયઃ સહ્યઃ શુક્તિમાનૃક્ષપર્વતઃ ।
વિન્ધ્યશ્ચ પારિયાત્રશ્ચ ઇત્યેતે કુલપર્વતાઃ ॥

અન્યે ચ મન્દરશારદર્દુરકોલાહલસુરમૈનાકવૈદ્યુતવારન્ધમપાણ્ડુર-
તુઙ્ગપ્રસ્થકૃષ્ણગિરિજયન્તરૈવત-
ઋષ્યમૂકગોમન્તચિત્રકૂટશ્રીચકોર-
કૂટશૈલકૃતસ્થલ ઇત્યેતે ક્ષુદ્રપર્વતાઃ ।
શેષાઃ ક્ષુદ્રતરાઃ । તેષામાર્યા મ્લેચ્છા જનપદા વસન્તિ ।
પિબન્તિ ચૈતાસુ નદીષુ પાનીયમ્ । તદ્યથા
ગઙ્ગા સિન્ધુ સરસ્વતી શતદ્રુ વિતસ્તા વિપાશા ચન્દ્રભાગા સરયૂ યમુના
ઇરાવતી દેવિકા કુહૂ ગોમતી ધૂતપાપા બાહુદા દૃષદ્વતી કૌશિકી નિસ્વરા
ગણ્ડકી ચક્ષુષ્મતી લોહિતા ઇત્યેતા હિમવત્પાદનિર્ગતાઃ ॥

વેદસ્મૃતિર્વેદવતી સિન્ધુપર્ણા સચન્દના સદાચારા રોહિપારા ચર્મણ્વતી
વિદિશા વેદત્રયી ઇત્યેતા પારિયાત્રોદ્ભવાઃ શોણા જ્યોતીરથા નર્મદા
સુરસા મન્દાકિની દશાર્ણા ચિત્રકૂટા તમસા પિપ્પલા કરતોયા
પિશાચિકા ચિત્રોત્પલા વિશાલા વઞ્જુલા બાલુકા વાહિની શુક્તિમતી
વિરજા પઙ્કિની રિરી કુહૂ ઇત્યેતા ઋક્ષપ્રસૂતાઃ । મણિજાલા શુભા તાપી
પયોષ્ણીં શીઘ્રોદા વેષ્ણા પાશા વૈતરણી વેદી પાલી કુમુદ્વતી તોયા દુર્ગા
અન્ત્યા ગિરા એતા વિન્ધ્યપાદોદ્ભવાઃ । ગોદાવરી ભીમરથી કૃષ્ણા વેણા
વઞ્જુલા તુઙ્ગભદ્રા સુપ્રયોગા વાહ્યા કાવેરી ઇત્યેતાઃ સહ્યપાદોદ્ભવાઃ ।
શતમાલા તામ્રપર્ણી પુષ્પાવતી ઉત્પલાવતી ઇત્યેતા મલયજાઃ ।
ત્રિયામા ઋષિકુલ્યા ઇક્ષુલા ત્રિવિદા લાઙ્ગૂલિની વંશવરા મહેન્દ્રતનયાઃ ।
ઋષિકા લૂમતી મન્દગામિની પલાશિની ઇત્યેતાઃ શુક્તિમત્પ્રભવાઃ ।
એતાઃ પ્રાધાન્યેન કુલપર્વતનદ્યઃ । શેષાઃ ક્ષુદ્રનદ્યઃ । એષ જમ્બૂદ્વીપો
યોજનલક્ષપ્રમાણતઃ । અતઃ પરં શાકદ્વીપં નિબોધત ।
જમ્બૂદ્વીપસ્ય વિસ્તારાદ્દ્વિગુણપરિણાહાલ્લવણોદકશ્ચ જમ્બૂદ્વીપસમસ્તેન
દ્વિગુણાવૃતઃ । તત્ર ચ પુણ્યા જનપદાશ્ચિરાન્મ્રિયન્તે
દુર્ભિક્ષજરાવ્યાધિરહિતશ્ચ દેશોઽયમ્ । સપ્તૈવ કુલપર્વતાસ્તાવત્
તિષ્ઠન્તિ તસ્ય ચોભયતો લવણક્ષીરોદધી વ્યવસ્થિતૌ । તત્ર ચ
પ્રાગાયતઃ શૈલેન્દ્ર ઉદયો નામ પર્વતઃ । તસ્યાપરેણ જલધારો નામ
ગિરિઃ । સૈવ ચન્દ્રેતિ કીર્ત્તિતઃ । તસ્ય ચ જલમિન્દ્રો ગૃહીત્વા
વર્ષતિ । તસ્ય પારે રૈવતકો નામ ગિરિઃ । સૈવ નારદો વર્ણ્યતે
તસ્મિંશ્ચ નારદપર્વતાદુત્પન્નો તસ્ય ચાપરેણ શ્યામો નામ ગિરિઃ ।
તસ્મિંશ્ચ પ્રજાઃ શ્યામત્વમાપન્નાઃ સૈવ દુન્દુભિર્વર્ણ્યતે । તસ્મિન્
સિદ્ધા ઇતિ કીર્તિતાઃ પ્રજાનેકવિધાઃ ક્રીડન્તસ્તસ્યાપરે રજતો
નામ ગિરિઃ સૈવ શાકોચ્યતે । તસ્યાપરેણામ્બિકેયઃ સ ચ વિભ્રાજસો
ભણ્યતે । સ એવ કેસરીત્યુચ્યતે । તતશ્ચ વાયુઃ પ્રવર્ત્તતે । ગિરિનામાન્યેવ
વર્ષાણિ તદ્યથા । ઉદયસુકુમારો જલધારક્ષેમકમહાદ્રુમેતિ પ્રધાનાનિ
દ્વિતીયપર્વતનામભિરપિ વક્તવ્યાનિ । તસ્ય ચ મધ્યે શાકવૃક્ષસ્તત્ર ચ
સપ્તમહાનદ્યો દ્વિનામ્ન્યઃ । તદ્યથા સુકુમારી કુમારી નન્દા વેણિકા ધેનુઃ
ઇક્ષુમતી ગભસ્તિ ઇત્યેતા નદ્યઃ ।

॥ ઇતિ શ્રીવરાહપુરાણે ભગવચ્છાસ્ત્રે પઞ્ચાશીતિતમોઽધ્યાયઃ ॥ ૮૫॥

## શ્રીવરાહપુરાણે ષડશીતિતમોऽધ્યાયઃ

રુદ્ર ઉવાચ ।
અથ તૃતીયં કુશદ્વીપં શૃણુત । કુશદ્વીપેન ક્ષીરોદઃ પરિવૃતઃ
શાકદ્વીપસ્ય વિસ્તારાદ્દ્વિગુણેન । તત્રાપિ સપ્ત કુલપર્વતાઃ ।
સર્વે ચ દ્વિનામાનઃ ।
તદ્યથા — કુમુદવિદ્રુમેતિ ચ સોચ્યતે । ઉન્નતો હેમપર્વતઃ સૈવ ।
બલાહકો દ્યુતિમાન્ સૈવ । તથા દ્રોણઃ સૈવ પુષ્પવાન્ । કઙ્કશ્ચ પર્વતઃ
સૈવ કુશેશયઃ । તથા ષષ્ઠો મહિષનામા સ એવ હરિરિત્યુચ્યતે ।
તત્રાગ્નિર્વસતિ । સપ્તમસ્તુ કકુદ્માન્ નામ સૈવ મન્દરઃ કીર્ત્યતે ।
ઇત્યેતે પર્વતાઃ કુશદ્વીપે વ્યવસ્થિતાઃ એતેષાં વર્ષભેદો ભવતિ
દ્વિનામસંજ્ઞઃ । કુમુદસ્ય
શ્વેતમુદ્ભિદં તદેવ કીર્ત્યતે । ઉન્નતસ્ય લોહિતં વેણુમણ્ડલં તદેવ
ભવતિ । બલાહકસ્ય જીમૂતં તદેવ રથાકાર ઇતિ ।દ્રોણસ્ય હરિતં
તદેવ બલાધનં ભવતિ । કઙ્કસ્યાપિ કકુદ્માન્ નામ । વૃત્તિમત્ તદેવ
માનસં મહિષસ્ય પ્રભાકરમ્ । કકુદ્મતઃ કપિલં તદેવ સઙ્ખ્યાતં
નામ ઇત્યેતાનિ વર્ષાણિ । તત્ર દ્વિનામ્ન્યો નદ્યઃ । પ્રતપા પ્રવેશા
સૈવોચ્યતે । દ્વિતીયા શિવા યશોદા સા ચ ભવતિ । તૃતીયા પિત્રા નામ
સૈવ કૃષ્ણા ભણ્યતે । ચતુર્થી હ્રાદિની નામ સૈવ ચન્દ્રા નિગદ્યતે ।
વિદ્યુતા ચ પઞ્ચમી શુક્લા સૈવ । વર્ણા ષષ્ઠી સૈવ વિભાવરી ।
મહતી સપ્તમી સૈવ ધૃતિઃ । એતાઃ પ્રધાનાઃ શેષાઃ ક્ષુદ્રનદ્યઃ ।
ઇત્યેષ કુશદ્વીપસ્ય સન્નિવેશઃ । શાકદ્વીપો દ્વિગુણઃ સન્નિવિષ્ટશ્ચ
કથિતઃ । તસ્ય ચ મધ્યે મહાકુશસ્તમ્બઃ । એષ ચ કુશદ્વીપો
દધિમણ્ડોદેનાવૃતઃ ક્ષીરોદદ્વિગુણેન ।

॥ ઇતિ શ્રીવરાહપુરાણે ભગવચ્છાસ્ત્રે ષડશીતિતમોऽધ્યાયઃ ॥ ૮૬॥

## શ્રીવરાહપુરાણે સપ્તાશીતિતમોऽધ્યાયઃ

રુદ્ર ઉવાચ ।
અથ ક્રૌઞ્ચં ભવતિ ચતુર્થં કુશદ્વીપાદ્દ્વિગુણમાનતઃ
સમુદ્રઃ ક્રૌઞ્ચેન
દ્વિગુણેનાવૃતઃ । તસ્મિંશ્ચ સપ્તૈવ પ્રધાનપર્વતાઃ ।

પ્રથમઃ કૌઞ્ચો વિદ્યુલ્લતો રૈવતો માનસઃ સૈવ પાવકઃ ।
તથૈવાન્ધકારઃ સૈવાચ્છોદકઃ । દેવાવૃત્તો સ ચ સુરાપો ભણ્યતે ।
તતો દેવિષ્ઠઃ સ એવ કાઞ્ચનશ‍ૃઙ્ગો ભવતિ । દેવનન્દાત્પરો
ગોવિન્દઃ, દ્વિવિન્દ ઇતિ । તતઃ પુણ્ડરીકઃ સૈવ તોષાશયઃ । એતે
સપ્ત રત્નમયાઃ પર્વતાઃ ક્રૌઞ્ચદ્વીપે વ્યવસ્થિતાઃ । સર્વે ચ
પરસ્પરેણોચ્છ્રયાઃ । તત્ર વર્ષાણિ તથા ક્રૌઞ્ચસ્ય કુશલો દેશઃ
સૈવ માધવઃ સ્મૃતઃ વામનસ્ય મનોઽનુગઃ સૈવ સંવર્તકસ્તતોષ્ણવાન્
સોમપ્રકાશઃ । તતઃ પાવકઃ સૈવ સુદર્શનઃ । તથા ચાન્ધકારઃ
સૈવ સમ્મોહઃ । તતો મુનિદેશઃ સ ચ પ્રકાશઃ । તતો દુન્દુભિઃ
સૈવાનર્થ ઉચ્યતે । તત્રાપિ સપ્તૈવ નદ્યઃ ॥ ૮૭.૧॥

ગૌરી કુમુદ્વતી ચૈવ સન્ધ્યા રાત્રિર્મનોજવા ખ્યાતિશ્ચ પુણ્ડરીકા ચ
ગઙ્ગા સપ્તવિધાઃ સ્મૃતાઃ । ગૌરી સૈવ પુષ્પવહા કુમુદ્વતી તામ્રવતી
રોધસન્ધ્યા સુખાવહા ચ મનોજવા ચ ક્ષિપ્રોદા ચ ખ્યાતિઃ સૈવ
ગોબહુલા પુણ્ડરીકા ચિત્રવેગા શેષાઃ ક્ષુદ્રનદ્યઃ ।
ક્રૌઞ્ચદ્વીપો ઘૃતોદેનાવૃતઃ । ઘૃતોદા શાલ્મલેનેતિ ॥ ૮૭.૨॥

॥ ઇતિ શ્રીવરાહપુરાણે ભગવચ્છાસ્ત્રે સપ્તાશીતિતમોઽધ્યાયઃ ॥ ૮૭॥

## શ્રીવરાહપુરાણે અષ્ટાશીતિતમોઽધ્યાયઃ

રુદ્ર ઉવાચ ।
ત્રિષુ શિષ્ટેષુ વક્ષ્યામિ દ્વીપેષુ મનુજાન્ચુત ।
શાલ્મલં પઞ્ચમં વર્ષં પ્રવક્ષ્યે તન્નિબોધત ।
ક્રૌઞ્ચદ્વીપસ્ય વિસ્તારાચ્છાલ્મલો દ્વિગુણો મતઃ ॥ ૮૮.૧॥

ઘૃતસમુદ્રમાવૃત્ય વ્યવસ્થિતસ્તદ્વિસ્તારો દ્વિગુણસ્તત્ર ચ સપ્ત પર્વતાઃ
પ્રધાનાસ્તાવન્તિ વર્ષાણિ તાવત્યો નદ્યઃ । તત્ર ચ પર્વતાઃ ।
સુમહાન્ પીતઃ શાતકૌમ્ભાત્ સાર્વગુણસૌવર્ણરોહિતસુમનસકુશલ
જામ્બૂનદવૈદ્યુતા ઇત્યેતે કુલપર્વતા વર્ષાણિ ચેતિ ।
અથ ષષ્ઠં ગોમેદં કથ્યતે ।
શાલ્મલં યથા સુરોદેનાવૃતં તદ્વત્ સુરોદોઽપિ
તદ્વિગુણેન ગોમેદેનાવૃતઃ । તત્ર ચ પ્રધાનપર્વતૌ દ્વાવેવ । એકસ્ય
તાવત્તાવસરઃ । અપરશ્ચ કુમુદ ઇતિ । સમુદ્રશ્ચેક્ષુરસસ્તદ્વિગુણેન

પુષ્કરેણાવૃતઃ । તત્ર ચ પુષ્કરાખ્યે માનસો નામ પર્વતઃ ।
તદપિ દ્વિધા છિન્નં વર્ષં તત્પ્રમાણેન ચ । સ્વાદોદકેનાવૃતમ્ ।
તતશ્ચ કટાહમ્ । એતત્ પૃથિવ્યાઃ પ્રમાણમ્ । બ્રહ્માણ્ડસ્ય ચ
સકટાહવિસ્તારપ્રમાણમ્ । એવંવિધાનામણ્ડાનાં પરિસઙ્ખ્યા ન વિદ્યતે ।
એતાનિ કલ્પે કલ્પે ભગવાન્ નારાયણઃ ક્રોડરૂપી રસાતલાન્તઃ પ્રવિષ્ટાનિ
દંષ્ટ્રૈકેનોદ્ધૃત્ય સ્થિતૌ સ્થાપયતિ ।
એષ વઃ કથિતો માર્ગો ભૂમેરાયામવિસ્તરઃ ।
સ્વસ્તિ વોઽસ્તુ ગમિષ્યામિ કૈલાસં નિલયં દ્વિજાઃ ॥ ૮૮.૨॥

શ્રીવરાહ ઉવાચ ।
એવમુક્ત્વા ગતો રુદ્રઃ ક્ષણાદદૃશ્યમૂર્તિમાન્ ।
તે ચ સર્વે ગતા દેવા ઋષયશ્ચ યથાગતમ્ ॥ ૮૮.૩॥

॥ ઇતિ શ્રીવરાહપુરાણે ભગવચ્છાસ્ત્રે અષ્ટાશીતિતમોઽધ્યાયઃ ॥ ૮૮॥

## શ્રીવરાહપુરાણે એકોનનવતિતમોઽધ્યાયઃ

ધરણ્યુવાચ ।
પરમાત્મા શિવઃ પુણ્ય ઇતિ કેચિદ્ભવં વિદુઃ ।
અપરે હરિમીશાનમિતિ કેચિચ્ચતુર્મુખમ્ ॥ ૮૯.૧॥

એતેષાં કતમો દેવઃ પરઃ કો વાઽથવાઽપરઃ ।
એતદ્દેવ મમાચક્ષ્વ પરં કૌતૂહલં વિભો ॥ ૮૯.૨॥

શ્રીવરાહ ઉવાચ ।
પરો નારાયણો દેવસ્તસ્માજ્જાતશ્ચતુર્મુખઃ ।
તસ્માદ્રુદ્રોઽભવદ્દેવિ સ ચ સર્વજ્ઞતાં ગતઃ ॥ ૮૯.૩॥

તસ્યાશ્ચર્યાણ્યનેકાનિ વિવિધાનિ વરાનને ।
શ‍ૃણુ સર્વાણિ ચાર્વઙ્ગિ કથ્યમાનં મયાઽનઘે ॥ ૮૯.૪॥

કૈલાસશિખરે રમ્યે નાનાધાતુવિચિત્રિતે ।
વસત્યનુદિનં દેવઃ શૂલપાણિસ્ત્રિલોચનઃ ॥ ૮૯.૫॥

સૈકસ્મિન્ દિવસે દેવઃ સર્વભૂતનમસ્કૃતઃ ।
ગણૈઃ પરિવૃતો ગૌર્યા મહાનાસીત્ પિનાકધૃક્ ॥ ૮૯.૬॥

તત્ર સિંહમુખાઃ કેચિદ્ગણા નર્દન્તિ સિંહવત્ ।
અપરે હસ્તિવક્ત્રાશ્ચ હયવક્ત્રાસ્તથાપરે ॥ ૮૯.૭॥

અપરે શિંશુમારાસ્યા અપરે સૂકરાનનાઃ ।
અપરેઽશ્વામુખા રૌદ્રા ખરાસ્યાજાનનાસ્તથા ।
છાગમત્સ્યાનનાઃ ક્રૂરા હ્યનન્તાઃ શસ્ત્રપાણયઃ ॥ ૮૯.૮॥

કેચિદ્ગાયન્તિ નૃત્યન્તિ ધાવન્તિ સ્ફોટયન્તિ ચ ।
હસન્તિ કિલકિલાયન્તિ ગર્જન્તિ ચ મહાબલાઃ ॥ ૮૯.૯॥

કેચિલ્લોષ્ટાંસ્તુ સઙ્ગૃહ્ય યુયુધુર્ગણનાયકાઃ ।
અપરે મલ્લયુદ્ધેન યુયુધુર્બલદર્પિતાઃ ।
એવં ગણસહસ્રેણ વૃતો દેવો મહેશ્વરઃ ॥ ૮૯.૧૦॥

યાવદાસ્તે સ્વયં દેવ્યા ક્રીડન્ દેવવરઃ સ્વયમ્ ।
તાવદ્બ્રહ્મા સ્વયં દેવૈરુપાયાત્ સહ સત્વરઃ ॥ ૮૯.૧૧॥

તમાગતમથો દૃષ્ટ્વા પૂજયિત્વા વિધાનતઃ ।
ઉવાચ પરમો દેવો રુદ્રો બ્રહ્માણમવ્યમ્ ॥ ૮૯.૧૨॥

કિમાગમનકૃત્યં તે બ્રહ્મન્ બ્રૂહિ મમાચિરમ્ ।
કિં ચ દેવાસ્ત્વરાયુક્તા આગતા મમ સન્નિધૌ ॥ ૮૯.૧૩॥

બ્રહ્મોવાચ ।
અસ્ત્યન્ધકો મહાદૈત્યસ્તેન સર્વે દિવૌકસઃ ।
અર્દિતા મત્સમીપં તુ બુદ્ધ્વા માં શરણૈષિણઃ ॥ ૮૯.૧૪॥

તતશ્ચૈતે મયા સર્વે પ્રોક્તા દેવા ભવં પ્રતિ ।
ગચ્છામ ઇતિ દેવેશ તતસ્ત્વેતે સમાગતાઃ ॥ ૮૯.૧૫॥

એવમુક્ત્વા સ્વયં બ્રહ્મા વીક્ષાં ચક્રે પિનાકિનમ્ ।
નારાયણં ચ મનસા સસ્માર પરમેશ્વરમ્ ।
તતો નારાયણો દેવો દ્વાભ્યાં મધ્યે વ્યવસ્થિતઃ ॥ ૮૯.૧૬॥

તતસ્ત્વેકીગતાસ્તે તુ બ્રહ્મવિષ્ણુમહેશ્વરાઃ ।
પરસ્પરં સૂક્ષ્મદૃષ્ટ્યા વીક્ષાં ચક્રુર્મુદાયુતાઃ ॥ ૮૯.૧૭॥

તતસ્તેષાં ત્રિધા દૃષ્ટિર્ભૂત્વૈકા સમજાયત ।
તસ્યાં દૃષ્ટ્યાં સમુત્પન્ના કુમારી દિવ્યરૂપિણી ॥ ૮૯.૧૮॥

નીલોત્પલદલશ્યામા નીલકુઞ્ચિતમૂર્દ્ધજા ।
સુનાસા સુલલાટાન્તા સુવક્ત્રા સુપ્રતિષ્ઠિતા ॥ ૮૯.૧૯॥

ત્વષ્ટ્રા યદગ્નિજિહ્વે તુ લક્ષણં પરિભાષિતમ્ ।
તત્સર્વમેકતઃ સંસ્થં કન્યાયાં સમ્પ્રદૃશ્યતે ॥ ૮૯.૨૦॥

અથ તાં દૃશ્ય કન્યાં તુ બ્રહ્મવિષ્ણુમહેશ્વરાઃ ।
ઊચુઃ કાઽસિ શુભે બ્રૂહિ કિં વા કાર્યં વિપશ્ચિતમ્ ॥ ૮૯.૨૧॥

ત્રિવર્ણા ચ કુમારી સા કૃષ્ણશુક્લા ચ પીતિકા ।
ઉવાચ ભવતાં દૃષ્ટેર્યોગાજ્જાતાઽસ્મિ સત્તમાઃ ।
કિં માં ન વેત્થ સુશ્રોણીં સ્વશક્તિં પરમેશ્વરીમ્ ॥ ૮૯.૨૨॥

તતો બ્રહ્માદયસ્તે ચ તસ્યાસ્તુષ્ટા વરં દદુઃ ।
નામ્નાઽસિ ત્રિકલા દેવી પાહિ વિશ્વં ચ સર્વદા ॥ ૮૯.૨૩॥

અપરાણ્યપિ નામાનિ ભવિષ્યન્તિ તવાનઘે ।
ગુણોત્થાનિ મહાભાગે સર્વસિદ્ધિકરાણિ ચ ॥ ૮૯.૨૪॥

અન્યચ્ચ કારણં દેવિ ત્રિવર્ણાઽસિ વરાનને ।
મૂર્તિત્રયં ત્રિભિર્વર્ણૈઃ કુરુ દેવિ સ્વકં દ્રુતમ્ ॥ ૮૯.૨૫॥

એવમુક્તા તદા દેવૈરકરોત્ ત્રિવિધાં તનુમ્ ।
સિતાં રક્તાં તથા કૃષ્ણાં ત્રિમૂર્તિત્વં જગામ હ ॥ ૮૯.૨૬॥

યા સા બ્રાહ્મી શુભા મૂર્તિસ્તયા સૃજતિ વૈ પ્રજાઃ ।
સૌમ્યરૂપેણ સુશ્રોણી બ્રહ્મસૃષ્ટ્યા વિધાનતઃ ॥ ૮૯.૨૭॥

યા સા રક્તેન વર્ણેન સુરૂપા તનુમધ્યમા ।
શઙ્ખચક્રધરા દેવી વૈષ્ણવી સા કલા સ્મૃતા ।
સા પાતિ સકલં વિશ્વં વિષ્ણુમાયેતિ કીર્ત્યતે ॥ ૮૯.૨૮॥

યા સા કૃષ્ણેન વર્ણેન રૌદ્રી મૂર્તિસ્ત્રિશૂલિની ।
દંષ્ટ્રાકરાલિની દેવી સા સંહરતિ વૈ જગત્ ॥ ૮૯.૨૯॥

યા સૃષ્ટિર્બ્રહ્મણો દેવી શ્વેતવર્ણા વિભાવરી ।
સા કુમારી મહાભાગા વિપુલાબ્જદલેક્ષણા ।
સદ્યો બ્રહ્માણમામન્ત્ર્ય તત્રૈવાન્તરધીયત ॥ ૮૯.૩૦॥

સાઽન્તર્હિતા યયૌ દેવી વરદા શ્વેતપર્વતમ્ ।

તપસ્તમું મહત્ તીવ્રં સર્વગત્વમભીપ્સતી ॥ ૮૯.૩૧॥

યા વૈષ્ણવી કુમારી તુ સાપ્યનુજ્ઞાય કેશવમ્ ।
મન્દરાદ્રિં યયૌ તમું તપઃ પરમદુશ્ચરમ્ ॥ ૮૯.૩૨॥

યા સા કૃષ્ણા વિશાલાક્ષી રૌદ્રી દંષ્ટ્રાકરાલિની ।
સા નીલપર્વતવરં તપશ્ચર્તું યયૌ શુભા ॥ ૮૯.૩૩॥

અથ કાલેન મહતા પ્રજાઃ સ્રષ્ટું પ્રજાપતિઃ ।
આરબ્ધવાન્ તદા તસ્ય વવૃધે સૃજતો બલમ્ ॥ ૮૯.૩૪॥

યદા ન વવૃધે તસ્ય બ્રહ્મણો માનસી પ્રજા ।
તદા દધ્યૌ કિમેતન્મે ન તથા વર્દ્ધતે પ્રજા ॥ ૮૯.૩૫॥

તતો બ્રહ્મા હૃદા દધ્યૌ યોગાભ્યાસેન સુવ્રતે ।
ચિન્તયન્ બુબુધે દેવસ્તાં કન્યાં શ્વેતપર્વતે ।
તપશ્ચરન્તીં સુમહત્ તપસા દગ્ધકિલ્બિષામ્ ॥ ૮૯.૩૬॥

તતો બ્રહ્મા યયૌ તત્ર યત્ર સા કમલેક્ષણા ।
તપશ્ચરતિ તાં દૃષ્ટ્વા વાક્યમેતદુવાચ હ ॥ ૮૯.૩૭॥

બ્રહ્મોવાચ ।
કિં તપઃ ક્રિયતે ભદ્રે કાર્યમાવેક્ષ્ય શોભતે ।
તુષ્ટોઽસ્મિ તે વિશાલાક્ષિ વરં કિં તે દદામ્યહમ્ ॥ ૮૯.૩૮॥

સૃષ્ટિરુવાચ ।
ભગવન્નેકદેશસ્થા નોત્સહે સ્થાતુમઞ્જસા ।
અતોઽર્થં ત્વાં વરં યાચે સર્વગત્વમભીપ્સતી ॥ ૮૯.૩૯॥

એવમુક્તસ્તદા દેવ્યા સૃષ્ટ્યા બ્રહ્મા પ્રજાપતિઃ ।
ઉવાચ તાં તદા દેવીં સર્વગા ત્વં ભવિષ્યસિ ॥ ૮૯.૪૦॥

એવમુક્તા તદા તેન સૃષ્ટિઃ સા કમલેક્ષણા ।
તસ્ય હ્યઙ્કે લયં પ્રાપ્તા સા દેવી પદ્મલોચના ।
તસ્માદારભ્ય કાલાત્ તુ બ્રાહ્મી સૃષ્ટિર્વ્યવર્દ્ધત ॥ ૮૯.૪૧॥

બ્રહ્મણો માનસાઃ સપ્ત તેષામન્યે તપોધનાઃ ।
તેષામન્યે તતસ્ત્વન્યે ચતુર્દ્ધા ભૂતસઙ્ગ્રહઃ ।
સસ્થાણુજઙ્ગમાનાં ચ સૃષ્ટિઃ સર્વત્ર સંસ્થિતા ॥ ૮૯.૪૨॥

યત્કિઞ્ચિદ્વાઙ્મયં લોકે જગત્સ્થાવરજઙ્ગમમ્ ।
તત્સર્વં સ્થાપિતં સૃષ્ટ્યા ભૂતં ભવ્યં ચ સર્વદા ॥ ૮૯.૪૩॥

॥ ઇતિ શ્રીવરાહપુરાણે ભગવચ્છાસ્ત્રે એકોનનવતિતમોઽધ્યાયઃ ॥ ૮૯॥

ઇતિ શ્રીરુદ્રગીતા સમાપ્તા ।

Varahapurana adhyAya 70-89
Refer to https//archive.org/details/VarahaPurana

Proofread by PSA Easwaran

*Rudra Gita*
pdf was typeset on July 17, 2022

Please send corrections to *sanskrit@cheerful.com*